इस प्रकार निवेदित हुए पदार्थों के विषय की चिन्ता की निवृत्ति का उपाय कह कर अब प्रभुचरण निवेदन के विषय की चिन्ता का उपाय कहने के आशय से आगे के श्लोक की व्याख्या **ननु सख्य** इत्यादि शब्दों से आरंभ कर रहे हैं। यहाँ समझना चाहिए कि प्रेमलक्षणा भक्ति के अंतर्गत कही गई नवधाभक्ति में से प्रत्येक भक्ति कहीं न कहीं, किसी न किसी साधन के तौर पर कही गई हैं। इनमें से प्रथम तीन भक्ति (अर्थात् 'श्रवण, कीर्तन एवं स्मरण') सेव्यस्वरूप की अपेक्षा न रखते हुए केवल अकेले जीव द्वारा भी की जा सकती हैं, इनमें भगवान के स्वरूप की आवश्यकता नहीं होती। इसी प्रकार चौथी 'पादसेवनं' भक्ति भी "राजा अंबरीष के पैर भगवान के क्षेत्र की यात्रा करने में लगे रहते (श्री.भा. ९/४/२)" इस नवमस्कंध के वाक्यानुसार पैरों द्वारा हरि की सेवा का अर्थ 'पादसेवनं' है" इस अर्थानुसार केवल जीव के द्वारा की जाने वाली सेवा है, इसमें भी भगवत्स्वरूप आवश्यक नहीं होता। किंतु यदि 'पादसेवनं' का अर्थ - प्रभु की चरणसेवा पादसेवनं है - इस प्रकार से करें तो फिर भगवत्स्वरूप अपेक्षित हो जाता है। वैसे ही अर्चन- आदि (अर्थात् 'अर्चन, वंदन, सख्य') तीनों भक्ति में सेव्यस्वरूप की अपेक्षा रहती है। अतः ये तीन अथवा चार प्रकार की भक्ति सेव्यस्वरूप के प्रत्यक्ष में प्रकट न होने पर भी सिद्ध हो जाती हैं। किंतु जहाँ तक 'सख्य' एवं आत्म-निवेदनरूपा भक्ति का प्रश्न है, तो ये भजनीय स्वरूप के प्रत्यक्ष प्रकट होने पर ही सिद्ध होती है। और यदि भजनीय-प्रभु भक्त में रही सख्यभक्ति एवं उसके द्वारा किए गये आत्म-निवेदन को साक्षात् प्रकट होकर अंगीकार करते हैं, तब ये दोनों प्रकार की भक्ति भी भगवद्-अंगीकार के द्वारा ही संभव हो पाती है। भगवान का ऐसे प्रकट होना भी प्रेमभक्ति के ही अधीन है। किंतु वर्तमान में तो जीव की साधनदशा है, और इस समय चूँकि भगवान प्रकट नहीं है अतः प्रभुचरणों द्वारा 'स्वयम्' इत्यादि शब्दों से कही चिन्ता हीन-मध्यम अधिकारियों को तो होती ही है अतः उनकी चिन्ता को निवृत्ति का उपाय वे कह

---

१ उक्तनिवेदकवदिति पाठः।

रहे हैं । अब 'पुरुषोत्तम' शब्द से लेकर' 'उक्तनिवेदनवत्' तक की पंक्ति की व्याख्या कर रहे हैं। इस पंक्ति में मूलश्लोक के 'तथा' पद का अर्थ प्रभुचरणों ने किया है ।

पुरुषोत्तमेन निरोधलीलायां स्वतोन्यभजनं क्रियमाणा भक्तास्तन्निवार्य स्वयमात्मसात्कृता इति तादृशे स्वयं सर्वात्मना निवेदने कृते सा शङ्का नोचितेति ज्ञापनाय पुरुषोत्तमपदम्। तत्रापि स्वरूपानन्ददानेनानिशं पोष्यमाणानां भक्तानां तदितरत्रोपयोगासम्भवेनैव न शङ्कोदय इति ज्ञापनाय श्रीपदम् । तथा च तद्युक्ते तत्र निवेदने सा त्याज्येति भावः ।

अत्र च सप्तम्यर्थे वतिः । तथा च यथा भगवद्धर्मोपक्रमरूपे निवेदनेऽन्यविनियोगादिना वैगुण्यतोपि भगवद्धर्मनाशा-भावाच्चिन्ता त्यज्यते, तथा अङ्गीकारसन्देहरूपा निवेदनविषयिण्यपि सा त्याज्येत्यर्थः । अत्र हेत्वपेक्षायां श्रीपुरुषोत्तमपदेन तं वदन्तीत्याशयेन तत्पदं विवृण्वन्ति, पुरुषोत्तमेनेत्यादि श्रीपदमित्यन्तम् । तात्पर्यं स्फुटीकुर्वन्ति तथा चेत्यादि । सरसभक्तयुक्तो भगवान् हीन्द्रयागभङ्गगोवर्धनोद्धरणादिलीलाभिस्तथाकुर्वन् स्वीयान् पुष्णातीति इन्द्रयागभङ्गादिबोधकाच्छब्दादेव भगवतस्तथास्वभावमवगत्य सा त्याज्या, स्वस्यानन्यभावेन भजनस्य निर्वाहे कार्यलिङ्गकानुमानादेवाङ्गीकारं निश्चित्य सा त्याज्या भक्तानां दयालुत्वादित्यर्थः ।

यहाँ 'उक्तनिवेदनवत्' शब्द में सप्तमी-विभक्ति के अर्थ में 'वत्' प्रत्यय हुआ है । अतः इस प्रकार जैसे भगवद्-धर्म को आरंभ करनेवाला निवेदन होने पर भगवान से अतिरिक्त अन्य कहीं अपना विनियोग हो जाने से विगुणता उत्पन्न होने पर भी भगवद्-धर्म का नाश नहीं होता और चिंता त्याग दी जाती है वैसे ही - निवेदन होने पर प्रभु ने मेरा अंगीकार किया या नहीं? इस प्रकार के संदेह से उत्पन्न होनेवाली निवेदनविषयक चिंता भी त्याग देनी चाहिए। यह चिन्ता क्यों त्याग देनी चाहिए ? इसका हेतु बताने के लिए 'पुरुषोत्तम' पद के द्वारा प्रभुचरणोंने 'पुरुषोत्तम' शब्द से लेकर 'श्रीपदम्' तक की पंक्ति द्वारा विवरण किया है । इसी का तात्पर्य उन्होंने इस पंक्ति के पश्चात् 'तथा च' इन शब्दों से स्पष्ट किया है । और वह यह कि, रसयुक्त-भक्त से युक्त भगवान ने इंद्रयाग-भंग एवं गोवर्धन-उद्धरण आदि लीलाओं द्वारा अपने स्वीयजनों का अन्याश्रय छुड़ाते हुए उनका पोषण किया है । अतः 'इंद्रयाग-भंग' जैसे शब्दों से ही बोध होते भगवान के ऐसे दयालु स्वभाव को जान कर चिन्ता त्याग देनी चाहिए । स्वयं के अनन्यभावपूर्वक भजन का निर्वाह होने पर भगवान के ऐसे दयालुता के कार्यलक्षणों के अनुमान द्वारा ही "मेरा अंगीकार अवश्य हुआ है" यह निश्चित् करके चिन्ता त्याग देनी चाहिए, क्योंकि भगवान भक्तों के लिए बड़े दयालु हैं, यह अर्थ है ।

न च निवेदनगद्ये भगवतः केवलस्यैव सम्प्रदानत्वमुक्तमिति कथमत्र श्रीपुरुषोत्तमपदेन भक्तयुक्ते निवेदनमुच्यत इति शङ्क्यम्। एकादश एव 'रामेण सार्धं' मित्यादिना या तावद्भक्तिः प्रशंसिता, तत्परमकारणत्वेनोनविंश आत्मनिवेदिधर्मा उक्ताः, तत्रात्मनिवेदनप्रकारो न स्फुट इति तत्रत्यं सर्वं संगृह्य कल्पसूत्रवत् गद्ये प्रभुणोक्तः, अतः कृष्णपदेन तत्र ताभिः सहित एव परामृश्यते । तेन भक्तयुक्तस्यैव सम्प्रदानत्वम् । किञ्च, सदानन्दो हि भगवान् रसात्मक एव, 'रसो वै सः' इति श्रुत्या सिद्धो, रसश्चालम्बनसापेक्ष एवेत्यतोपि तथेपि न विरोधगन्धोपि ।

और, यहाँ ये शंका भी नहीं करनी चाहिए कि निवेदन-गद्यमंत्र में तो केवल भगवान को ही निवेदन करना कहा गया है और यहाँ श्री से युक्त अर्थात् भक्तों से युक्त 'श्रीपुरुषोत्तम' में निवेदन करना कहा जा रहा है । (टीकाकार कहना चाह रहे हैं कि शंका ये हो सकती है कि गद्यमंत्र में तो केवल भगवान को निवेदन करना कहा गया है और यहाँ 'श्रीपुरुषोत्तम' को निवेदन करना कहा जा रहा है, वह कैसे ? प्रभुचरणों ने अपनी टीका में भक्तों को अपने स्वरूपानंद का दान देने वाले पुरुषोत्तम के अर्थ में 'श्री' पद को स्पष्ट किया है अतः यहाँ ऐसे भक्तों से युक्त पुरुषोत्तम अर्थात् 'श्रीपुरुषोत्तम' को निवेदन करना सिद्ध हो रहा है यह अर्थ है ।) क्योंकि एकादश स्कंध में "हे उद्धव ! जिस समय अक्रूरजी मुझे भैया बलराम के संग व्रज से मथुरा ले आए (श्री.भा. ११/१२/१०)" इत्यादि वाक्यों द्वारा जिस भक्ति की प्रशंसा की गई है, उसी भक्ति के परमकारणरूप आत्मनिवेदियों के धर्म उन्नीसवें अध्याय में कहे गये हैं । वहाँ आत्मनिवेदन का प्रकार स्पष्टतापूर्वक नहीं कहा गया है । अतः वहाँ से उन उपदेशों को संग्रहीत करके कर्मों के कल्पसूत्र की भाँति प्रभु ने गद्यमंत्र में कहे हैं । (धर्म-संबंधी व्यवस्था बताने वाले ग्रंथ को "कल्पसूत्र" कहते हैं । इनमें छोटे छोटे सूत्रों द्वारा शौचसंबंधी, वैदिकसंबंधी, यज्ञसंबंधी, व्यवस्था दर्शाई गई है) अतः गद्यमंत्र में श्री 'कृष्ण' पद के द्वारा भक्तों के सहित भगवान में ही निवेदन करना कहा गया है । इस कारण गद्यमंत्र में भी व्रजगोपिकाओं से युक्त भगवान में ही निवेदन है । और भी सदानंद भगवान "वह भगवान निश्चित् ही रसरूप है (वै. ३०/२/७)" इस श्रुति के द्वारा रसात्मक सिद्ध होते हैं और रस तो किसी न किसी के आलंबन भाव की अपेक्षा रखता ही है, इस कारण से भी वे व्रजगोपिकाओं/व्रजभक्तों से युक्त भगवान हैं अतः यहाँ विरोध की गंध भी नहीं है । (टीकाकार ने उपयुक्त श्रुति द्वारा भगवान को रसात्मक

सिद्ध किया है । इसके पश्चात् वे कहते हैं कि रस की पहली शर्त यही है कि वह किसी न किसी के आलंबनभाव के बिना टिक नहीं सकता। ठीक इसी प्रकार भगवान भी यदि रसरूप हैं तो व्रजभक्तों के आलंबनभाव के कारण ही हैं । व्रजभक्तों के बिना उनकी रसरूपता सिद्ध ही नहीं हो सकती है । अतः इससे भी सिद्ध होता है कि पुष्टिप्रभु भक्तयुक्त-भगवान हैं, यह अर्थ है।)

कदाचिल्लोकभयाद्युपस्थितौ तन्निवारणाय जीवस्वभाववशादन्यविनियोगेपि तथेत्याहुः विनियोगेपीति । प्रमादात्तथासम्भवेपि प्रभुर्न त्यक्ष्यति । यतस्तत्स्वभाववशात्तथाभूतमप्युद्धर्तुं तत्साधनानपेक्षः ॥ ५ ॥

ननु सत्यमेवम्, तथापि स्वस्य कदाचित् कथञ्चिदन्यविनियोगे जाते तस्माद्विरुद्धकार्यादङ्गीकारे सन्देहो भवत्येवेति तद्रूपा सा कथं त्यक्तुं शक्येत्याकाङ्क्षायां तत्रोपायं वदन्तीत्याशयेनोत्तरार्धमवतारयन्ति कदाचिदित्यादि । न तथेति । न कार्या । व्याकुर्वन्ति प्रमादादित्यादि । तत्स्वभाववशात्तथाभूतमिति । जीवस्वभाववशात् कदाचित् बहिर्मुखम् । तथा च तादृशस्य कदाचिदनन्यभजनाभावेनैवं बाहिर्मुख्ये तस्य जुगुप्सा तूत्पद्यत एवेति तेन कार्येण सप्रतिबन्धकमङ्गीकारमनुमाय 'हराम्यघं यत्स्मर्तॄणां हविर्भागं क्रतुष्वहम् । वर्णश्च मे हरिश्चेष्टस्तस्माद्धरिरहं स्मृत' इति भारते भगवद्वचनात्, भगवतः स्वीयाघनिवर्तकत्वमनुसन्धाय अपराधिनां बकीबकादीनामप्यनुग्राहकत्वेन जीवकृतसाधनानपेक्षत्वं चानुसन्धाय सा त्याज्येत्यर्थः । एतेनैतादृशदीनभावोत्पत्तिरङ्गीकार-लक्षणमित्युक्तम् ॥ ५ ॥

चलिए मान लें कि ऐसा ही है और जीव कोई चिन्ता न करे परंतु कदाचित् निवेदन करने के पश्चात् यदि स्वयं का विनियोग प्रभु के अतिरिक्त अन्यत्र हो जाय, जो निवेदन की मर्यादा के विरुद्ध है तो ऐसे में 'प्रभु ने हमें अंगीकार किया या नहीं ?' ऐसा संदेह तो होता ही है । तो ऐसी चिन्ता त्यागनी कैसे संभव है ? यह शंका होने पर उसका उपाय कहने के आशय से प्रभुचरण श्लोक की दूसरी पंक्ति का विवरण 'कदाचित्' शब्द से लेकर 'न तथा' तक की पंक्ति द्वारा कर रहे हैं । वे कहते हैं कि ऐसी चिन्ता नहीं करनी चाहिए । अब 'प्रमादात्' शब्द से लेकर 'भूतम्' तक की पंक्ति की व्याख्या कर रहे हैं । जीव के स्वभाववश कभी बहिर्मुखता हो जाती है । और उस बहिर्मुख हुए जीव को भगवान का अनन्ययतापूर्वक भजन प्राप्त न होने के कारण उस बहिर्मुखता से आत्मग्लानि तो उत्पन्न होती ही है । अतः महाभारत में कहे "मैं स्मरण करने वालों के पाप हरण करता हूँ, यज्ञों में दी गई आहुति का हरण करता हूँ अतएव मेरा नाम 'हरि' है" इस वाक्य के द्वारा-भगवान प्रतिबंधकों के सहित जीव को अंगीकार करते हैं - यह अनुमान लगाकर चिन्ता त्याग देनी चाहिए । और, "भगवान स्वीयजनों के पापों के निवर्तक हैं" ऐसा अनुसंधान करके एवं चूँकि भगवान ने पूतना एवं बकासुर जैसे अपराधियों पर भी कृपा की थी अतः भगवान जीव के साधनों की अपेक्षा नहीं रखते हैं, यह अनुसंधान रखकर चिन्ता त्याग देनी चाहिए, यह अर्थ है । इससे यह सिद्ध हुआ कि हृदय में ऐसा दीनभाव उत्पन्न होना ही अंगीकार का लक्षण है, यह कहा है ॥५॥

अङ्गीकारे लक्षणान्तरमप्याहुः लोक इति ।

लोके स्वास्थ्यं तथा वेदे हरिस्तु न करिष्यति ।
पुष्टिमार्गस्थितो यस्मात् साक्षिणो भवताखिलाः ॥ ६ ॥

कदाचित् प्रवाहवशाल्लौकिके वाणिज्यादौ, वैदिके आश्रमधर्मादौ वा स्थितौ तत्र विघ्न एव भवति, न तु तत्फलमित्यर्थः । तत्र हेतुः पुष्टीति । तद्विनापि स्वबलेनैव सर्वकर्ता यत इति भावः । पुष्टिमार्गाङ्गीकारे मर्यादां न सहत इति ज्ञेयम् । एवं सति किं कार्यमित्याकाङ्क्षायामाहुः, साक्षिवत् तत्कृतं पश्यत ॥ ६ ॥

एतदाढ्यार्थमन्यदपि वदन्तीत्याशयेनाग्रिममवतारयन्ति अङ्गीकार इत्यादि । व्याकुर्वन्ति कदाचिदित्यादि । अत्र च 'त्रैवर्गिकायासे'ति पूर्वोक्तं षष्ठस्कन्धवाक्यमेव बीजत्वेन ज्ञेयम्, पुष्टिप्रकरणस्थत्वात् । तथाच यथा वृत्रस्य तादृशसङ्कष्टोपस्थितावपि भगवत्प्रसादानुमितिरेव जाता, तथास्यापि लौकिकवैदिकास्वास्थ्योपस्थितौ यद्भगवत्प्रसादानु-सन्धानम्, तदप्यङ्गीकारलक्षणम् । एतादृशबोधवन्तं प्रत्युपदिशन्ति साक्षिण इत्यादि । तद् व्याकुर्वन्ति साक्षिवत् तत्कृतं पश्यतेति । तथा च 'ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे । यद्वदन्ति यदिच्छन्ति चानुमोदेत निर्मम' इति सप्तमस्कन्धस्थभगवदीयगृह-स्थप्रकरणस्थवाक्यात् पूर्वोक्तरीत्या

---

१. न तथेति पाठः । २. बाहिर्मुख्यम् ३. उत्पत्स्यत इति ।

एतदाचार्यवाक्येन लौकिके वैदिके साक्षिवत् भगवत्कृतित्वदर्शनं यत्तदपि तल्लक्षणमित्यर्थः ॥ ६ ॥

इसी पक्ष को दृढ़ करने के आशय से प्रभुचरण अग्रिम श्लोक की व्याख्या 'अंगीकार' इत्यादि शब्दों से आरंभ कर रहे हैं । अब 'कदाचित्' इत्यादि शब्दों की व्याख्या करते हैं । प्रभुचरणों ने जो यहाँ 'कदाचित्' से लेकर 'अर्थः' तक की पंक्ति में जो विघ्नवाली बात कही है, उसका कारण तो उन्हीं के द्वारा पूर्व में कहा "भगवान अपने भक्त के धर्म-अर्थ-काम संबंधी प्रयासों को निष्फल कर देते हैं (श्री.भा. ६/११/२३)" ये षष्ठस्कंध का वाक्य ही जानना चाहिए क्योंकि यह वाक्य पुष्टि के प्रकरण में कहा गया है । जैसे वृत्रासुर को संकट की ऐसी परिस्थिति होने पर भी भगवान की कृपा का ही अनुसंधान हुआ, वैसे ही यहाँ इस जीव को लौकिकवैदिक असफलता से दुःख प्राप्त होने पर भी जब भगवत्कृपा का ही अनुसंधान होता है, तो वह भी भगवान द्वारा अंगीकार किए जाने का ही लक्षण है । ऐसे विवेकी जीव के प्रति ही आचार्यचरणों ने **साक्षिणः** शब्दों द्वारा उपदेश किया है । प्रभुचरणों ने भी इसी का 'साक्षिवत् तत्कृतं पश्यत' इत्यादि शब्दों से किया है । और भी, "माता-पिता, भाई-बन्धु, पुत्र-मित्र, और जातिबंधु चाहे जो कहें या चाहें, उनमें ममतारहित होकर उन्हें प्रसन्न रखना चाहिए (श्री.भा. ७/१४/६)" इस सप्तम-स्कंध में कहे 'भगवदीय गृहस्थ प्रकरण' के इस वाक्य के अनुसार, पूर्व में कही रीति द्वारा इन आचार्यवचनों द्वारा लौकिकवैदिक में केवल साक्षिवत् भगवत्कृतियों को देखते रहना भी अंगीकार का लक्षण है ॥६॥

सेवाकृतिर्गुरोराज्ञा बाधनं वा हरीच्छया ।
अतः सेवापरं चित्तं विधाय स्थीयतां सुखम् ॥ ७ ॥

सेवाकृतिरिति । गुर्वाज्ञाया अबाधनं यथा भवति, तथा सेवाकृतिः पूर्वमपेक्षिता । एवं वर्तमानानां कदाचिद् विशेषतो भगवदाज्ञा चेत्, गुर्वाज्ञा विरुद्धा भवेत्, तदा तथा कार्यमित्याशयेनाहुः बाधनं वा हरीच्छया । विकल्पेनाबाधनमित्यर्थः । एवं सति गुर्वाज्ञाया अबाधने बाधने वा सेवैव मुख्या यतोऽतस्तथैव स्थेयमित्याहुः अत इति ।

नन्वत्रास्वास्थ्येपि साक्षिवत्कृतिदर्शनोपदेशेन त्रिदुःखसहनरूपं धैर्यमेव साधनत्वेनोक्तं भवति, ततश्च तावन्मात्रस्य कर्तव्यत्वे सेवायाः सम्यगसम्भवान्निवेदनवैयर्थ्यं तु स्यादेवेति प्रकारान्तरेण धर्महानिचिन्तप्राप्तौ तन्निवृत्त्यर्थमुपदिशन्तीत्याशयेनाग्रिममवतारयन्ति एवं सतीत्यादि । व्याकुर्वन्ति गुर्वाज्ञाया इत्यादि । तथा कार्यमिति । बाधनं कार्यम् । तथा च 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरा'विति श्वेताश्वतरश्रुते 'नैवोऽपयन्त्यपचितिं कवयस्तवेश ब्रह्मादयोऽपि कृतमृद्धमुदः स्मरन्तः । योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ती'त्येकादशवाक्यादिभ्यश्च गुरुरेव मुख्य इति । गुर्वाज्ञाबाधनाभावपूर्वकं सेवाकृतिरात्मनिवेदिधर्मः स यादृशेन साक्षिवत् तत्कृतिदर्शनेन न विघटितो भवति, तादृशतया साक्षिवत् स्थातव्यम्, न तु सेवाविरुद्धतया । तेन लौकिके विषये साक्षिवत् स्थेयम्, न तु सेवाविषये इति सिध्यति । तत्रापि हरीच्छा विचार्या, अबाधने बाधने वा सास्तीति ।

परंतु यहाँ एक शंका यह होती है कि, यहाँ लोकवेद में असफलता प्राप्त होने पर भी साक्षि की भाँति केवल भगवल्लीला को देखते रहने का उपदेश ऐसा लगता है मानो तीन प्रकार के दुःखों में धैर्य रखने का उपदेश दिया जा रहा हो । अतः यदि केवल धैर्यपूर्वक देखते ही रहें तो भगवत्सेवा भलीभाँति से हो नहीं पायेगी और निवेदन व्यर्थ चला जायेगा । अतः इस दूसरे प्रकार से होती धर्महानि की चिन्ता होने पर उसकी निवृत्ति के लिए प्रभुचरणों ने अग्रिम श्लोक का आरंभ 'एवं सति' इत्यादि शब्दों से किया है । इसी को वे 'गुर्वाज्ञाया' से लेकर 'तथा कार्यम्' की पंक्ति में व्यख्यायित कर रहे हैं । अर्थात् विशेष भगवद्-आज्ञा होने पर गुरु-आज्ञा को बाधित कर देना चाहिए । और, "जिसकी परमात्मा में परम भक्ति है और वैसी ही गुरु में भी है, उसी महात्मा के हृदय में ये उपदेश प्रकाशित होते हैं (श्वेता. ६/२३)" इस श्रुति के द्वारा एवं "हे भगवन् ! आप समस्त प्राणियों के अन्तःकरण में अन्तर्यामी एवं बाहर गुरुरूप से स्थित होकर उनके पाप नष्ट कर देते हैं । बड़े-बड़े ज्ञानी ब्रह्मा की आयु पाकर भी आपका उपकार नहीं चुका सकते अतः वे निरंतर आपका स्मरण करते हैं (श्री.भा. ११/२९/६)" इत्यादि एकादशस्कंध के वाक्यों द्वारा गुरु ही मुख्य हैं । अतः गुरु की आज्ञा बाधित न हो ऐसे प्रकार से सेवा करनी आत्मानेवेदियों का धर्म है । भगवत्कृति को साक्षिवत् देखते रहना चाहिए परंतु भगवत्सेवा त्याग दें, ऐसा नहीं । इससे यह सिद्ध होता है कि लौकिक विषयों में ही साक्षिवत् देखते रहना चाहिए, भगवत्सेवा के विषय में नहीं । तिस पर भी हरि की इच्छा का ही विचार

---

१. बाधनमिति पाठः ।

करना चाहिए क्योंकि गुरु की आज्ञा बाधन करने में या अबाधन करने में भी मूलकारण तो भगवद्-इच्छा ही है ।

एवं सति पर्यवसितं सुखमेवेत्याशयेन सुखमित्युक्तम् ॥ ७ ॥

सा च भगवदनुभावमनुभवतो बुद्धिगोचरो भवति, अन्यस्य तु फलबलकल्प्या । एवं सति यथाधिकारं तां बुद्ध्वा कार्यम् । ततो न स्वधर्महानिरित्यर्थः । एतदेव निगमयितुमुत्तरार्धमित्याशयेनावतारयन्ति एवं सतीत्यादि । तथा च यथा राजभोगसमये नेत्रे निमील्य वीजयन्तं बृहद्रामदासं प्रति भगवता श्रीगोवर्धनेश्वरेण साक्षाद्भुञ्जानं मामुन्मील्य पश्येत्याज्ञप्ते, ममाचार्याज्ञा भोगसमये दर्शनविषयिणी नास्तीति नोन्मीलयिष्यामीति तैः प्रत्युक्तम्, तदा भगवान् प्रसन्न आसीत् । सामग्र्यादिविषयिण्यां विशेषाज्ञायां तु साधारण्याचार्याज्ञा बाध्यते, तदा नाप्रसन्नो भवति, तेन सेवाया एव मुख्यत्वम्, अतस्तदनुसारेणैव स्थेयमित्यर्थः । अत्रापि 'परिनिष्ठा तु पूजाया'मिति निवेदिप्रकरणस्थं भगवद्वाक्यमेव बीजत्वेन ज्ञेयम् । सर्वतो नितरां निरवधितया वा स्थितेरेव परिनिष्ठापदार्थत्वादिति ॥ ७ ॥

और, हरि की इच्छा तो भगवद्-अनुभाव का अनुभव करनेवालों को ही दृष्टिगोचर होती है, अन्य तो भक्ति में प्राप्त फल एवं प्रभुसामर्थ्य के बल की कल्पना ही कर सकते हैं । ऐसा होने पर यथाधिकार भगवद्-इच्छा को समझकर कार्य करना चाहिए । इससे स्वधर्म की हानि नहीं होगी, यह अर्थ है । इसी बात को बताने के लिए प्रभुचरणों ने मूलश्लोक की दूसरी पंक्ति का विवरण 'एवं सति' इत्यादि शब्दों से आरंभ किया है । और भी, जैसे वार्ता में उल्लेख है कि राजभोग के समय में नेत्र बंद करके पंखा करते हुए बड़े रामदासजी को भगवान श्रीगोवर्धनेश्वर ने आज्ञा दी कि - नेत्र खोल कर मुझे साक्षात् भोजन करते हुए देखो-तब उन्होंने प्रत्युत्तर दिया कि - आचार्यचरणों ने मुझे भोग के समय दर्शन करने की आज्ञा नहीं दी है अतः मैं नहीं खोलूँगा - तब भगवान प्रसन्न ही हुए । अतः सामग्री आदि के विषय में यदि भगवान की कोई विशेष आज्ञा का पालन करने में आचार्यचरणों की साधारण आज्ञा बाधित हो जाय तो श्रीमहाप्रभु अप्रसन्न नहीं होंगे । अतः सेवा की ही मुख्यता है और उसके अनुसार ही रहना चाहिए, यह अर्थ है । यहाँ भी "मेरी पूजा में निष्ठा रखे (श्री.भा. ११/१९/२०)" इस आत्म-निवेदन के प्रकरण में आए भगवद्-वाक्य को मूल कारण जानना चाहिए । क्योंकि किसी भी विषय में सभी प्रकार से अथवा निरंतर स्थायी रहना ही परिनिष्ठा का द्योतक है ॥ ७ ॥

कदाचित् पुत्रादिवियोगशङ्काजनितदुःखेन चिन्तासम्भवे गतिमाहुः चित्तोद्वेगमिति ।

चित्तोद्वेगं विधायापि हरिर्यत्करिष्यति ।
तथैव तस्य लीलेति मत्वा चिन्तां द्रुतं त्यजेत् ॥ ८ ॥

ननु भवत्वेवमल्पदुःखोपस्थितौ साक्षिवत् स्थितिः, महादुःखोपस्थितौ त्वेवं स्थितिरशक्येत्याशङ्कानिवृत्त्यर्थमग्रिमं वदन्तीत्याशयेनाग्रिममवतारयन्ति कदाचिदित्यादि । मूलव्याख्यानं तु स्पष्टत्वात् न कृतम्, परं तत्रायं भावः । अवश्यंभाविनो दुःखस्याप्रतीकार्यत्वात्तत्र चित्तसमाधानमेवोपायः । तच्च नानोपायैर्भवति । यथा सप्तमस्कन्धे यमप्रेतसुयज्ञबन्धुसंवादे 'अहो अमीषां वयसाधिकाना'मित्यादिना यमप्रदर्शितलोकगतिज्ञानेन सुयज्ञबन्धूनां जातम्, यथा च षष्ठस्कन्धे 'यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः । पर्यटन्ति नरेष्वेवं जीवा योनिषु कर्तृष्वि'ति जीवबाक्याज्जीवस्य सर्वसाधारण्यज्ञानेन चित्रकेतुप्रभृतीनाम् । यथा च 'पित्रोः स किन्तु भार्यायाः स्वामिनोग्नेः श्वगृध्रयोः । किमात्मनः किं सुहृदामिति यो नावसीयत' इति देहस्य सर्वसाधारण्यज्ञानेन पुरूरवसः । एवमन्येपि बोध्याः ।

किंतु यहाँ एक शंका यह होती है कि अल्पदुःख की परिस्थिति में भले ही साक्षिवत् रह लें परंतु किसी महान दुःख की परिस्थिति में तो इस प्रकार से रहना असंभव ही है अतः ऐसी शंका की निवृत्ति के लिए अग्रिम श्लोक की भूमिका 'कदाचित्' इन शब्दों से प्रभुचरण कह रहे हैं । मूलश्लोक तो स्पष्ट ही है अतः उसकी व्याख्या नहीं कर रहा हूँ परंतु उसका भाव यह है कि, अवश्यंभावी दुःख को टाला नहीं जा सकता अतः अपने चित्त का समाधान करना ही उसका उपाय है । और वह समाधान नानाविध उपायों द्वारा किया जाता है । जैसे सप्तमस्कंध में "अरे क्या आश्चर्य है कि ये मुझसे उम्र में बड़े होकर भी जीवनमरण में हर्षशोकाकुल होकर मूर्खता कर रहे हैं (श्री.भा. ७/२/३७)" इत्यादि मृत सुयज्ञ के परिवार एवं यमराज के संवाद के अंतर्गत यम के द्वारा प्रदर्शित लोकगति के ज्ञान से जैसे मृत सुयज्ञ के परिवार जनों के चित्त का समाधान हुआ और जैसे षष्ठस्कंध में "सुवर्ण आदि पदार्थों का संबंध भी मनुष्य के साथ क्षणिक ही होता

१. अस्येति पाठः ।

है । जब तक जिस वस्तु से जिसका संबंध रहता है तभी तक उस वस्तु से ममता भी रहती है (श्री.भा. ६/१६/६)" इस वाक्य द्वारा सर्वसाधारण ज्ञान से 'चित्रकेतु' जैसों के चित्त का समाधान हुआ और जैसे "यह शरीर मातापिता का है या पत्नी संपत्ति ? स्वामी के द्वारा मोल ली गई वस्तु है, आग का ईंधन है, या कुत्ते का गिद्धों का भोजन है ? अपना है या सगे-संबंधियों का ? यह बहुत सोचने पर भी निश्चित् नहीं होता (श्री.भा. ११/२६/१९)" इत्यादि वाक्यों से देह के सर्वसाधारण ज्ञान द्वारा जैसे पुरूरवा के चित्त का समाधान हुआ, वैसे ही अन्यों को अपने चित्त का समाधान कर लेना चाहिए ।

ते केपि नात्मनिवेदिनामुपयुज्यन्ते, भगवत्स्मरणोदासीनत्वात्, किन्तु प्रभासीयलीलायां 'नैषां वधोपाय इयानतोन्य' इत्येकादशीयभगवद्विचारानुवादवाक्यात् सा लीला यथा भक्तानां चित्तोद्वेगं विधाय, या कृता लोकमर्यादारक्षणार्थम्, अग्रे तेषां नित्यसुखदानार्थं च, तथा चित्तोद्वेगं विधाय अपिशब्दादविधाय च हरिः स्मर्तृणां प्रारब्धादिरूपाघहारको भगवांस्तद्धरणार्थं यद्यत् शुभत्वेनाशुभत्वेन वा आपाततः प्रतीयमानं करिष्यति, तत्कार्यं साक्षाद्वा केनचित् द्वारेण वा तस्य "अस्मदीश्वरस्यास्मदात्मनो भगवतस्तथैव लीला," अनेन प्रकारेणास्माकं महतोऽघस्य नाशनाय मायिकी लीलेति मत्वा साधकबाधकप्रमाणैरनुचिन्त्य चिन्तां उद्वेगजनिकां वा तज्जनितां वा तद्रूपां वा द्रुतं शीघ्रमेव त्यजेत् । तस्याः बहुकालं स्थाने कालकर्मस्वभावानां प्रबलत्वेन तया असुरप्रवेशरूपमहोपद्रवसम्भवेन मुख्यफलप्रतिबन्धो वा विलम्बो वा स्यात्, अतो मंक्षु त्यजेदिति भावः ॥ ८ ॥

परंतु इन सभी की तुलना आत्मनिवेदियों के संग नहीं की जा सकती क्योंकि उपर बताए गये ये सभी लौकिकशोक से दुःखी हो रहे हैं एवं भगवत्स्मरण में उदासीन हैं । किंतु प्रभासक्षेत्र में की कई प्रभु की लीला के अंतर्गत "इसके अतिरिक्त इनके नाश का और कोई उपाय नहीं है (श्री.भा. ३/३/१५)" इस वाक्य के द्वारा भगवान ने भक्तों के चित्त में उद्वेग उत्पन्न करके जो लीला की वह लोकमर्यादा की रक्षा करने के लिए एवं उन यादवों को (विशेष जानकारी के लिए उपर्युक्त तीसरे स्कंध की कथा अवश्य पढ़ें जहाँ प्रभु ने यादवों का नाश भी उनके ही सुख के लिए किया है) नित्यसुख देने के लिए की है । और, इस प्रकार प्रभु चित्त में उद्वेग उत्पन्न करें या न भी करें, क्योंकि विधाय शब्द में 'अपि' शब्द जुड़ा हुआ है अतः अर्थ यह निकलता है कि भगवान उद्वेग उत्पन्न करें या न भी करें; किसी भी परिस्थिति में स्मरण करने वालों के भाग्य-आदि जैसे दुःखों को हरने वाले भगवान-हरि उन दुःखों को हरने के लिए आकस्मिक या दृश्यमान कार्य, शुभ-अशुभ जो कुछ करेंगे वह साक्षात करें या किसी के द्वारा; यह तो उनकी लीला है यह मानकर एवं "यह हमारे आत्मारूप ईश्वर भगवान की ऐसी ही लीला है" इस प्रकार से एवं "हमारे महान पापों का नाश करने के लिए यह उनकी मायिकी लीला है" यह मानकर साधक और बाधक प्रमाणों का विचार करके उद्वेग को उत्पन्न करनेवाली चिंता हो अथवा उद्वेग से उत्पन्न होने वाली चिंता हो अथवा तो उद्वेगरूप हो, सभी चिंताएँ शीघ्र त्याग देनी चाहिए । यदि चिन्ता बहुत समय तक रह जाय तो काल-कर्म-स्वभाव के प्रबल होने के कारण चिन्ता के द्वारा आसुरीभाव प्रविष्ट हो जायेगा और बड़ी समस्याएँ उत्पन्न हो जाएँगी । इससे मुख्यफल में या तो प्रतिबंध होगा या फिर विलंब हो जायेगा अतः चिन्ता शीघ्र ही त्याग देनी चाहिए, यह भाव है ॥ ८ ॥

नन्विदमखिलमशक्यमिव भाति । तथाहि । श्रवणमारभ्य सख्यपर्यन्तागतौ हि पश्चान्निवेदनवार्ता । तत्र प्रत्येकं तदेव दुरापमिति दूरतरा निवेदनदिगपि ।

एवमत्र पुष्टिमार्गस्थस्य पूर्वं सेवोपकरणकरणकर्तृनिवेदनविषयकचिन्तानिवृत्त्युपायत्वेन स स विचार उपदिष्टः, ततः सेवाकृत्यविरुद्धतया साक्षिवत् स्थित्युपदेशेन सेवायां स्थितेश्चोपदेशेन वैराग्यरागौ विषयभेदेन व्यवस्थापितौ । चित्तोद्वेगे च लीलाविचार उपदिष्टः, तदिदानीं सर्वमशक्यम्, कालादिकृतगुणक्षोभेण चित्तस्थैर्यस्य दुर्घटत्वात्, अतोऽयमुपदेशोनुपदेश एवेत्याशङ्क्य कृपया तत्सिद्ध्यर्थमुपायमधुनोपदिशन्तीत्याशयेनाग्रिममवतारयन्ति नन्विदमित्यादि । तदेव दुरापमिति । श्रवणं हि भगवद्वाचकपदवाक्यानां गुरुमुखाच्छक्तितात्पर्यनिर्धारः । तत्पूर्वकमन्यस्याग्रे कथनं कीर्तनम् । तेषामर्थानुसन्धानं स्मरणम् । तदिदानीं सर्वतद्विदो गुरोर्दौर्लभ्येन श्रवणस्य दुरापत्वे कीर्तनस्मरणयोरपि तथात्वम् । तदभावे भगवत्स्वरूपज्ञानाभावात् पादसेवनादीनामपि भगवद्विषयत्वाभावात्तथात्वम् । एवं कालादिभिः प्रतिबन्धकैः प्रत्येकमपि द्रष्टव्यम् ।

इस प्रकार यहाँ पुष्टिमार्गीय जीव को भगवत्सेवा में उपयोगी साधनों को जुटाने की चिंता, उसके द्वारा किए गए निवेदन-विषयक चिन्ताओं की निवृत्ति के उपाय रूप में उपर्युक्त विचार उपदिष्ट कर दिए गये; इसके पश्चात् सेवाकृति से विरुद्ध न जाते हुए साक्षिवत् रहने के उपदेश से सेवा में रहने का प्रकार उपदिष्ट किया गया और 'वैराग्य' एवं 'राग' के विषयभेद से व्यवस्था बताई गई । (अर्थात्

लौकिकविषयों में वैराग्य रखते हुए साक्षिवत् देखते रहना चाहिए एवं अलौकिक विषयों में राग अर्थात् स्नेह रखना चाहिए । अलौकिक विषयों में साक्षिवत् देखते रहने का उपदेश नहीं है ।) और चित्त में उद्वेग होने पर प्रभु-लीला का अनुसंधान रखना उपदिष्ट किया गया। परंतु ये सभी उपदेश वर्तमान में पालन करने कठिन हैं । क्योंकि काल-आदि के द्वारा जीव में सत्व-रज-तम इत्यादि प्राकृत गुणों के द्वारा व्यवधान उत्पन्न हो जाने से चित्त की स्थिरता ही बड़ी कठिन है । अतः यह उपदेश, उपदेश ही नहीं है, ऐसी आशंका होने पर प्रभुचरण कृपापूर्वक अब इसका उपाय अग्रिम श्लोक के विवरण में 'नन्विदम्' इत्यादि शब्दों से लेकर 'दुरापम्' इस शब्द तक की पंक्ति से आरंभ कर रहे हैं । इस पंक्ति से यह समझना चाहिए कि, भगवान को बताने वाले पदवाक्यों का तात्पर्य गुरुमुख से समझना 'श्रवण' है । श्रवण के संग-संग भगवद्-गुणों को किसी दूसरे के आगे कहना 'कीर्तन' है । उन वाक्यों का निरंतर अनुसंधान करना 'स्मरण' है । परंतु ऐसे सर्वज्ञ गुरु वर्तमान में प्राप्त होने दुर्लभ होने के कारण श्रवण प्राप्त होना भी दुर्लभ है और कीर्तन-स्मरण भी। इन सबके अभाव में भगवत्स्वरूप ज्ञान होना संभव नहीं है और अन्य दूसरी 'पादसेवनं' इत्यादि भक्ति भी भगवत्स्वरूप का ज्ञान न होने से दुर्लभ हैं । इस प्रकार कालादि का प्रतिबंध होने के कारण प्रत्येक भक्ति दुर्लभ हैं, यह जान लेना चाहिए ।

अतस्तत्कृतचिन्तान्यवियोगचिन्तादिसमाहितिर्निरर्थेति विचार्य साधनफले एकीकृत्य सर्वसमाधानमाहुः तस्मादिति ।

साधनफले एकीकृत्य सर्वसमाधानमाहुरिति । साधनं श्रवणाद्यष्टकम् । फलमात्मनिवेदनम् । ते उभे एकीकृत्य स्वासाध्यत्वेन तस्यां कोटौ निक्षिप्य पूर्वोक्तस्य सर्वस्य सुसाध्यत्वं यथा भवति, तादृशं तत्सम्बन्धिसमाधानमाहुरित्यर्थः । समाधानं व्याकुर्वन्तः शरणागतेः समाधायकत्वे बीजमाहुः यस्मादित्यादि । भक्तिमार्गे प्रवेशे तत्र रुच्यादौ चानुग्रह एव हेतुरिति वरणश्रुत्या भक्तिहेतुनिर्णये व्युत्पादितम् । तस्मिन् सति यदा सेवाप्रतिबन्धसम्भवः, तदा प्रारब्धकालस्वभावानामेव हेतुत्वम् । तन्निवृत्तिस्तत्सर्वनियामकेन प्रभुणैव भवति, नान्यतः । तत्र च शरणागतिरेव साधनम् । 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच'इति भगवद्वाक्यात् । 'देवर्षिभूताप्तनृणां पितृणां न किंकरो नायमृणी च राजन् । सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कृत्य'मित्येकादशस्कन्धे करभाजनवाक्याच्च भगवतः शरण्यता ।

अब "साधनफले एकीकृत्य सर्वसमधानमाहुः" इत्यादि शब्दों की व्याख्या कर रहे हैं । यहाँ श्रवण-आदि आठ प्रकार की भक्ति तो 'साधन' हैं एवं आत्मनिवेदन 'फल' है । जीव के लिए ये सभी असाध्य हैं अतः साधन एवं फल इन दोनों को एक करके इन्हें अशक्य कोटि में रखते हुए पहले कहे गये समस्त उपदेश जिस प्रकार से सुसाध्य बन जाएँ, वैसा समाधान अब प्रभुचरण कह रहे हैं, यह अर्थ है । उस समाधान की व्याख्या करते हुए 'शरणागति' से किस प्रकार समाधान हो जायेगा ? इसका हेतु प्रभुचरण 'यस्मात्' इत्यादि शब्दों से कह रहे हैं । भक्तिमार्ग में प्रवेश प्राप्त होना एवं उसमें रुचि-आदि होना, इन सब में मूलकारण भगवद्-अनुग्रह ही है, यह बात भक्तिहेतुनिर्णय ग्रंथ में वरणश्रुति द्वारा (अर्थात् यमेवैष वृणुते (कठो. १/२/२३) व्युत्पादित की गई है । भक्तिमार्ग में प्रवेश होने पर जब सेवा में प्रतिबंध होता हो, तब उस प्रतिबंध में प्रारब्ध, काल और स्वभाव ही मूल कारण है । इनकी निवृत्ति तो इन सभी के नियामक प्रभु द्वारा ही होती है, अन्य किसी के द्वारा नहीं । अतः यहाँ शरणागति ही साधन है । क्योंकि "सभी धर्मों का त्याग करके मात्र मेरी शरण आ जा । मैं तुझे समस्त पापों से मुक्त कर दूँगा, शोक मत कर (भ.गी. १८/६६)" एवं एकादशस्कंध में आए "हे राजन् ! जो मनुष्य कर्म वासनाओं का परित्याग करके शरणागतवत्सल भगवान मुकुंद की शरण में आ गया है वह देवताओं, ऋषियों, पितरों, प्राणियों, कुटुंबियों आदि सबके ऋण से मुक्त हो जाता है (श्री.भा. ११/६/४१)" इस करभाजन के वाक्य द्वारा भगवान ही एकमात्र शरण हैं ।

तस्मात् सर्वात्मना नित्यं श्रीकृष्णः शरणं मम ।
वदन्निरेवं सततं स्थेयमित्येव मे मतिः ॥ ९ ॥

यस्मादुक्तरीत्या स्वतः सर्वमशक्यमतः सर्वात्मना शरणागतौ प्रभुरेव सम्पादयिष्यतीति हृदयम् । भक्तिमार्गीयान् सर्वानंशान् विचार्य तत्र प्रतिबन्धं स्वाशक्तिं च स चेत् पश्यति, तदा सर्वात्मना तथा भवति । नित्यमिति नैरन्तर्यमुच्यते ।

तस्मादङ्गीकृतस्य जीवस्योक्तरीत्या अशक्तौ शरण्यत्वात् प्रभुरेव सर्वं सम्पादयिष्यतीत्याचार्याणामाशय इत्यर्थः ।

---

१ भगवद्भक्तद्वारा भगवच्चरणगमनं तदनुसन्धानं च साधनम् । फलं भगवदङ्गीकारः । ततो भगवद्भक्तद्वारा भगवच्चरणगतौ भगवता निवेदनस्याङ्गीकाराद्भक्तिषु क्रमनियमाभावान्निवेदनसिद्धेस्तत्र चिन्तासाधनानामयुक्तत्वादिति भावः ।

एतेनाष्टमस्कन्धप्रतिपादित आपत्सु हरिसंस्मृतिरिति भगवद्भक्तिसम्पादक आपद्धर्मोपि गजेन्द्रस्येवास्यापि सिध्यतीत्यपि बोध्यम् । नन्वेवं सति प्रथमत एवेदं साधनं कुतो नोपदिष्टमित्यत आहुः भक्तीत्यादि । सर्वात्मना तथा भवतीति । श्रीकृष्णाश्रयोक्तरीत्या सर्वेषां सहकारिणामतथात्वमसहायत्वं च निश्चित्य, विवेकादीनां भक्त्यन्तानां साधनानां स्वासाध्यत्वं च निश्चित्य, दीनभावेन सर्वैः प्रकारैः शरणागतिर्भवति । तथा च प्रागेवोपदेशार्हत्वेपि यदधुना सर्वान्त उपदिष्टम्, तत् सर्वात्मना सर्वैः प्रकारैर्भवनार्थमित्यर्थः ।

अतः अंगीकृत जीव यदि कमी अशक्त हो जाय तब पूर्व में कही रीति से शरणागत होने पर प्रभु ही उसके समस्त कार्य संपादित करेंगे, यह आचार्यचरणों का आशय है - यह अर्थ है । उपर्युक्त वाक्यों के अनुसार यह समझना चाहिए कि जैसे श्रीमद्-भागवत के आठवें स्कंध में बताया गया है कि, आपत्तिकाल में गजेंद्र को जिस प्रकार से उसके पूर्वजन्म की हरिसंस्मृति बनी रही और जिस प्रकार वह आपत्तिकाल उसके लिए भगवद्-भक्ति को सिद्ध करने वाला बन गया और उसे प्रभुप्राप्ति हो गई (देखें श्री.भा. ८/३/१) वैसे ही यहाँ प्रभु के शरणागत जीव को भी प्रभु सभीकुछ सिद्ध करेंगे, यह प्रभुचरण बोधित कर रहे हैं । यहाँ एक शंका यह होती है कि, यदि ऐसा ही है तो सर्वप्रथम शरणागति का ही उपदेश क्यों नहीं दे दिया गया ? पूर्व में दूसरे उपदेशों की क्या आवश्यकता थी ? तो इसका समाधान प्रभुचरण 'भक्ति' शब्द से आरंभ करके 'सर्वात्मना तथा भवति' तक की पंक्ति द्वारा दे रहे हैं । इस पंक्ति का भावार्थ यह है कि 'कृष्णाश्रयग्रंथ' में कही रीति के अनुसार जब जीव यह निश्चय लेता है कि शरणागति के अतिरिक्त कोई भी अन्य साधन उसका सहकारी या सहायक नहीं हैं एवं विवेक-धैर्य- आश्रय आदि से लेकर भक्तिपर्यंत समस्त साधन उसके लिए असाध्य हैं, तब ही वह दीनभाव से सभी प्रकार से शरणागति लेता है, यह अर्थ है । और, यद्यपि इन सभी का उपदेश आरंभदशा में ही दिया जा सकता है परंतु अभी इस समय संपूर्ण उपदेश करने का कारण ही यह है कि, जीव उपर्युक्त समस्त साधनों की विफलताओं का भलीभाँति विचार करके शरणागति की ओर अग्रसर हो ।

अन्यथा कालेनासुरधर्मप्रवेशः स्यात् । अन्तःकरणे तथाभावेऽतथाभावे वा तथा वदनमावश्यकमिति ज्ञापयितुं सततमेवं वदद्भिरित्युक्तम् । एवं सति लोकशिक्षाप्यानुषङ्गिकी सिध्यति । एवमुक्तप्रकारेण सेवापरतया स्थेयमित्यर्थो वा ।

आसुरधर्मप्रवेशः इति । बहिर्मुख्यजनकाहङ्कारप्रवेशः । तथा वदनमावश्यकमिति । वाचस्तेजोमयेत्वेन वदनाङ्गयो।य वैखरीत्वेपि वक्तुः पश्यन्ती प्रकाशयन्त्यन्तःकरणमासुरधर्मात् परावर्तयेदत आवश्यकम् । परोपकारायापि भवेत्, अतश्च तथेति बोधनायाहुः एवं सतीत्यादि । एवं सत्याश्रयस्यैव मुख्यता आयातीति सेवावश्यकत्वबोधकपूर्वग्रन्थविरोध इत्यतः प्रकारान्तरेण व्याकुर्वन्ति एवमुक्तेत्यादि । एवं वदद्भिःसर्वचिन्ताराहित्यपूर्वकं सेवापरतया स्थेयम् । तथा चाङ्गत्वेनैवात्र शरणोपदेशो, न तु मार्गत्वेन, अतो न विरोध इत्यर्थः ।

अब आसुरधर्मप्रवेशः इत्यादि शब्दों की व्याख्या कर रहे हैं । 'आसुरधर्म' का अर्थ है - बहिर्मुखता से उत्पन्न अहंकार का प्रवेश हो जाना अब **तथा वदनमावश्यकम्** इन शब्दों की व्याख्या कर रहे हैं । (इससे आगे की पंक्तियों का अर्थ समझने से पहले यहाँ वाणी के विषय में कुछ शास्त्रोक्त बातें जान लेनी आवश्यक हैं । वाणी के चार प्रकार बताए गये हैं । वे हैं - वैखरी, मध्यमा, पश्यन्ती और परा। संक्षेप में यह समझें कि, मनुष्य अपने विचारों को अपने शब्दों के माध्यम से आकार देता है, तो इसे हम वाणी कहते हैं । हम जब बोल रहे होते हैं, तब उस वाणी को वैखरी-वाणी कहा जाता है । यह वाणी शरीर के बाहर प्रकट होती है परंतु शरीर के अंदर प्रकट होने वाली वाणी "मध्यमा" एवं "पश्यन्ती" है । "परा" वाणी जीवगत नहीं मानी गई है । यहाँ श्रीपुरुषोत्तमजी "श्रीकृष्णः शरणं मम" बोलने के विषय में वाणी की महत्ता समझा रहे हैं) वाणी का स्वरूप तेजोमयी है और बोलने की प्रक्रिया में भले ही वह वैखरी बन जाए तथापि शरीर के भीतर रहने वाली पश्यन्ती-वाणी जीव के अन्तःकरण को प्रकाशित करती है और अन्तःकरण को आसुरधर्म से हटा देती है । अतः "श्रीकृष्णः शरण मम" बोलना आवश्यक है । इस अष्टाक्षर महामंत्र को बोलते रहने से वह अन्य दूसरे जीवों के लिए भी परोपकारी सिद्ध होगा, इस कारण प्रभुचरण इस बात को **एवं सति** इत्यादि शब्दों से कह रहे हैं । किंतु इस परिस्थिति में 'आश्रय' की ही मुख्यता सिद्ध हो जाती है और सेवा को आवश्यक बताने वाले पूर्वग्रंथ 'सिद्धांतरहस्य' से इसका विरोध हो जाता है अतः इसी भाव को प्रभुचरण दूसरे प्रकार से 'एवमुक्त्या' इत्यादि शब्दों से विस्तारित कर रहे हैं । इस पंक्ति का अर्थ यह है कि, इस प्रकार 'अष्टाक्षर' बोलते हुए समस्त चिंताओं से रहित रहते हुए भगवत् सेवापर होकर रहना चाहिए । और इस शरणागति का उपदेश भी सेवा के अंगभूतकार्य के अर्थ में है

पृथकमार्ग के रूप में नहीं अतः विरोध नहीं है, यह अर्थ है ।

नन्विदमपि न स्वशक्यमित्याशङ्क्य 'यमेवैष वृणुत' इति श्रुतेर्मे मतिरित्येव, एवंप्रकारिकैवेत्यर्थः ।

स्वमत्या निष्कर्षकथनस्य तात्पर्यमाहुः नन्वित्यादि । इदं सर्वात्मना शरणगमनमपि न स्वशक्यम्, 'सोहं तवाङ्घ्र्युपगतोस्म्यसतां दुराप'मित्यक्रूरस्तुतौ तथा सिद्धत्वादित्याशङ्क्य 'यमेवैष वृणुत' इति वरणलभ्यत्वबोधकश्रुतेर्मे मतिरेवंप्रकारिकैव । भगवता यदानुगृह्यते, तदैव सर्वात्मना शरणागतिर्भवति, नान्यथा । 'तच्चाप्यहं भगवदनुग्रहमीश मन्ये पुंसो भवेद्यर्हि संसरणापवर्गः । त्वय्यब्जनाभ सदुपासनया मतिः स्या'दिति तत्रैव वाक्यशेषात् ।

श्रीमदाचार्याचरणों को स्वमति से कहे इस निष्कर्षवाक्य का तात्पर्य प्रभुचरण 'नन्विदम्' इत्यादि शब्दों द्वारा समझा रहे हैं । इस पंक्ति का भावार्थ यह है कि, सभी प्रकार से ऐसी शरणागति करनी भी जीव के लिए शक्य नहीं है अतः "दुष्टों के लिए दुर्लभ ऐसी आपके चरणकमलों की छत्रछाया में मैं आपकी कृपा के कारण ही आया हूँ (श्री.भा. १०/४०/२८)" इन वाक्यों में अक्रूरजी द्वारा भगवान की स्तुति के द्वारा शरणागति की दुर्लभता सिद्ध है । इस कारण "जिसको यह परमात्मा स्वीकार कर लेता है उसी को प्राप्त होता है (कठो १/२/२३)" इस भगवद्-वरण को बताने वाली श्रुति के अनुसार श्रीमदाचार्य कह रहे हैं कि, 'मेरी मति तो यही है कि भगवद्-अनुग्रह के बिना शरणागति भी संभव नहीं है ।' अर्थात् जब भगवान अनुग्रह करते हैं तब ही सभी प्रकार से शरणागति हो सकती है, अन्यथा नहीं । क्योंकि उपर्युक्त अक्रूरजी के स्तुतिवाक्य के पश्चात् के "इस शरणागति को मैं आपकी ही कृपा मानता हूँ । क्योंकि "हे पद्मनाभ ! जब जीव के संसार से मुक्त होने का समय आता है, तब चित्तवृत्ति आप में ही लगती है (श्री.भा. १०/४०/२८)" यह वाक्य हैं ।

तथा चास्मिन् मार्गे कृपैव साधनम्, अतः श्रुत्यनुसारेण मार्गप्रवेशतद्रुच्यादिना वरणमनुमाय मदीयैरेवमेव कर्तव्यं वक्तव्यं च । यदि च न तन्निर्वाहः, तदा प्रतिबन्धकमनुमेयम् । भगवच्छास्त्रे एतदतिरिक्तस्य दृढस्य सर्वप्रतिनिधिभूतस्य साधनान्तरस्याभावात् । गीतायामन्ते एतस्यैव शोकाभावार्थमुपदेशेन तथा निश्चयात् । एतद्वाक्यान्तःस्थस्य श्रीकृष्णपदस्य भक्तसहितपुरुषोत्तमवाचकतायाः सुप्रसिद्धत्वेन मम स एव शरणमिति तस्मिन् स्वरक्षकत्वबोधनेन वाक्यतात्पर्यस्य तत्रैव निधरि गुरुमुखाद्वृत्ते श्रवणस्य तत्पूर्वकाणामन्येषां च स्वरूपफलयोस्तत एव सुखेन सिद्धेरिति ॥ ९ ॥

इस प्रकार यह सिद्ध होता है कि इस मार्ग में भगवद्-कृपा ही साधन है अतः उपर्युक्त कठोपनिषद् की श्रुति के आधार पर पुष्टिभक्तिमार्ग में अपना प्रवेश होने के द्वारा एवं इस मार्ग में हमारी 'रुचि' को देखकर यह अनुमान लगाना चाहिए कि, प्रभु ने हमारा वरण कर लिया है । ऐसा अनुमान करके मेरे स्वीयजनों को उपर्युक्त उपदेशों के अनुसार ही करना चाहिए एवं अष्टाक्षर बोलते रहना चाहिए - यह श्रीमदाचार्यचरणों का कथन है । यदि तब भी निर्वाह न हो एवं असफलता हाथ लगे तब भगवान प्रतिबंध कर रहे हैं, ऐसा अनुमान लगाना चाहिए । क्योंकि पुष्टिभक्तिमार्ग में शरणागति के साधन के अतिरिक्त अन्य दूसरे किसी दृढ़ साधन के लिए अवकाश नहीं है। गीता के अंत में भी शोकरहित होने के लिए शरणागति का ही उपदेश है (देखें सर्वधर्मान् (भा.गी. १८/६०) । अतः यह निश्चित् है । मूलश्लोक में 'श्रीकृष्ण' पद भक्तसहित पुरुषोत्तम के वाचक के अर्थ में सुप्रसिद्ध है अतः 'वे ही मेरी शरण हैं' इस प्रकार के अर्थ द्वारा "ऐसे भक्तसहित पुरुषोत्तम श्रीकृष्ण ही मेरे रक्षक हैं " इस प्रकार का तात्पर्य जब गुरुमुख से प्राप्त हो जाता है, तब ऐसे श्रवण एवं अन्य नवधाभक्ति के अंगों का स्वरूप एवं फल भी शरणागति द्वारा ही सुखपूर्वक सिद्ध होता है ॥ ९ ॥

भक्तिमार्गे प्रवृत्तस्य दार्ढ्यार्थमिदमुच्यते ।
अन्यस्य सूर्य इव तद्विमुखस्यात्र नार्थिता ॥ १ ॥
भक्तिमार्गसुधासिन्धोर्विचारमथनैः स्वयम् ।
स्फुटीकृतानि रत्नानि श्रीमदाचार्यपण्डितैः ॥ २ ॥
मयोज्वलीकृतानीत्थं हृदि धृत्वा व्रजाधिपम् ।
भजन्तु भक्ता येनासौ न विमुञ्चति कर्हिचित् ॥ ३ ॥
इति श्रीश्रीविट्ठलदीक्षितविरचितो नवरत्नप्रकाशः समाप्तः ।

एवं सर्वं व्याख्याय ग्रन्थकरणस्यान्ते शरणमंत्रावृत्तिकथनस्य च प्रयोजनमाहुः **भक्तिमार्ग** इत्यादि । भगवत्कृपया यो भक्तिमार्गे स्वकृतार्थत्वाय प्रवृत्तः, तस्य दार्ढ्यार्थं तदुक्तरीत्या फलावश्यंभावनिश्चयेन प्रवृत्त्यविघातार्थं इदं नवरत्नं शरणमंत्रावर्तनं चोच्यत आचार्यैरुपदिश्यते । तस्यैवोद्वेगनिवर्तनस्य प्रभूणामनन्यजनवत्सलतयावश्यकत्वात्, न तु साधारणार्थम्, तत्र हेतुः **अन्धस्येत्यादि** । **तद्विमुखस्येति** । भक्तिमार्गाद्बहिर्मुखस्य । **अत्रेति** । चिन्तानिवृत्त्युपायबोधकेस्मिन् ग्रन्थे । शरणमन्त्रावर्तने च । तथा चार्थित्वस्य अधिकारिविशेषणत्वाद्विमुखस्य चार्थित्वाभावेनाधिकाराभावात्तदर्थं नोच्यत इत्यर्थः । एतस्य ग्रन्थस्य भगवत्सिद्धान्तसारत्वबोधनायाहुः **भक्तीत्यादि** ।

इस प्रकार सभी विषयों का व्याख्यान करके ग्रंथ के अंत में शरणमंत्र की आवृत्ति (अर्थात् बारबार अष्टाक्षर लेते रहना) कहने का प्रयोजन प्रभुचरण 'भक्तिमार्ग' इत्यादि शब्दों से कह रहे हैं । इस श्लोक का अर्थ यह है कि, भगवत्कृपा से स्वयं को कृतार्थ करने के लिए जो इस भक्तिमार्ग में प्रवृत्त हुआ है, उसकी दृढ़ता के लिए एवं भक्तिमार्ग कही रीति से फलप्राप्ति अवश्य है ही अतः उसकी प्रवृत्ति भंग न हो जाय इसके लिए इस 'नवरत्नग्रंथ' एवं 'शरणमंत्र' के आवर्तन का उपदेश आचार्यचरण कर रहे हैं । और चूँकि भगवान अनन्यजनवत्सल हैं अतः उस जीव के उद्वेग की निवृत्ति उनके लिए आवश्यक है । किंतु यह निवृत्ति केवल अनन्यजनों के लिए है, साधारण जीवों के लिए नहीं अतः प्रभुचरणों ने 'अन्धस्य' शब्दों से लेकर 'तद्विमुखस्य' शब्द तक कहा है। **तद्विमुखस्य** शब्द का अर्थ है - भक्तिमार्ग से विमुख। अत्र शब्द का अर्थ है - चिन्तानिवृत्ति के उपायों का बोध कराने वाले इस 'नवरत्नग्रंथ' में एवं शरणमंत्र का आवर्तन करने में भक्तिमार्ग से विमुख वे साधारण जीव अधिकारी नहीं हैं । और, दूसरा अर्थ यह भी है कि प्रभुचरणों ने यहाँ अर्थिता पद प्रयुक्त किया है, जिससे यहाँ किसी विशेष अधिकारी का बोध हो रहा है । अतः यदि उस जीव में भगवत्प्राप्ति की चाहना नहीं है तो वह अधिकारी नहीं है अतः ऐसे अनधिकारियों के लिए ये उपदेश नहीं है, यह अर्थ है । इस ग्रंथ के अंतर्गत भगवद्-सिद्धांत का सार बताने के लिए प्रभुचरणों ने 'भक्ति' इत्यादि शब्दों से लेकर 'श्रीमदाचार्यपंडितैः' तक की पंक्ति द्वारा कहा है ।

श्रीमदाचार्यपण्डितैरिति । मयूरव्यंसकादिसमासः । पण्डितत्वं च न केवलं सदसद्विवेचकबुद्धिमत्त्वम्, शास्त्रोत्यबुद्धिमत्वं वा । किन्तु **'पण्डितो बन्धमोक्षवि'दित्येकादशे भगवद्वाक्यात्, 'यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः । ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधा'इति गीतायां भगवद्वाक्याच्च तादृशधर्मवत्त्वं विवक्षितम्, अन्यथा भक्तिमार्गविचारस्यासम्भवात् । 'भगवान् ब्रह्म कात्स्न्येने'ति द्वितीयस्कन्धवाक्येन भक्तिमार्गस्य सर्वश्रुतिसारत्वनिश्चयादिति । स्वकृतविवरणप्रयोजनमाहुः मयेत्यादि । तथा चैतदर्थं विवरणमित्यर्थः** ॥ १० ॥

'श्रीमदाचार्यपंडित' शब्द में मयूरव्यंसक वर्ग का समास है । केवल सद्-असद् का बुद्धिपूर्वक विवेचन कर देना ही अथवा तो शास्त्रबुद्धि रखना ही पांडित्य नहीं है परंतु "बंधन एवं मोक्ष को जानने वाला ही पंडित है (श्री.भा. ११/१९/४१)" इस एकादशस्कंध में भगवद्-वाक्य के द्वारा एवं "जिसके सभी कर्म इंद्रियतृप्ति की कामना से रहित हैं, उसे 'पंडित' कहा जाता है (भ.गी. ४/१९)" इत्यादि गीता में कहे भगवद्-वाक्य के द्वारा पंडित में ऐसे धर्म होने आवश्यक हैं। यदि श्रीमदाचार्यचरणों में ऐसा पांडितत्य न होता तो भक्तिमार्ग का विचार करना भी असंभव था । क्योंकि 'भगवान ब्रह्मा ने संपूर्णरूप से समस्त वेदों का तीन बार अनुशीलन करके यही निश्चय किया कि, जिससे भगवान के प्रति प्रेम प्राप्त हो, वही सर्वश्रेष्ठ मार्ग है (श्री.भा. २/२/३४)' इस द्वितीय स्कंध के वाक्य द्वारा निश्चय होता है कि यह पुष्टिभक्तिमार्ग समस्त श्रुतियों का सार है एवं श्रीमदाचार्य ऐसे भक्तिमार्ग के प्रवर्तक हैं । प्रभुचरणों ने अपने द्वारा किए गये इस ग्रंथ के विवरण का प्रयोजन 'मया' इत्यादि शब्दों से कहा है । भक्तजनों के हितार्थ प्रभुचरणों ने इस ग्रंथ का विवरण किया है, यह अर्थ है ॥ १० ॥

एवं चात्र एतत् सिद्धम् । भगवत्सेवैकतानचित्तेन यथाशक्ति सेवां कुर्वता दुःसङ्गवर्जनपूर्वकं स्वस्य स्वपरिकरस्य च भगवदीयत्वमनुसन्दधानेन पूर्वोक्तरीत्या सर्वविधचिन्तास्त्यजता सर्वत्र स्वाशक्त्यनुसन्धानेन भगवत एव शरणत्वमनुसन्दधानेन यदा स्थीयते, तदा उद्वेगाख्यप्रतिबन्धनिवृत्त्या सेवाया आधिदैविकीत्वं सम्पद्यते । तस्मादुक्तरीत्या सेवापूर्वकं सर्वात्मना शरणगमनमेव परमं साधनमिति ।

नवरत्नभासनकृतां वचसां मम यत्नपूर्वकमुपासनतः ।
व्रजरत्नहृद्यकृपयास्तु[1] सुखादसपत्नचैतससपत्नहतिः[2] ॥ १ ॥

इति श्रीमद्वल्लभाचार्यचरणैकतानस्य पीताम्बरस्य तनुजेन पुरुषोत्तमेन
कृतो नवरत्नविवृतिप्रकाशः सम्पूर्णः ।

---

१. अनन्यभजनेति पाठः । २. व्रजरत्नहृद्यकृपयैव भवेदसपत्नचैतससपत्नहतिरिति पाठः ।

श्रीपुरुषोत्तमजीकृतटीका

इस प्रकार इन उपर्युक्त विवरणों से यह सिद्ध हुआ कि, एक भगवद्-सेवा में चित्त लगाकर यथाशक्ति सेवा करते हुए दुःसंगत्यागपूर्वक और स्वयं में एवं परिवारजनों में भगवदीयता के अनुसंधान से एवं पूर्व में कही रीति द्वारा समस्त प्रकार की चिन्ता त्यागते हुए और सर्वत्र अपनी असमर्थता एवं भगवान की ही शरणागति के अनुसंधान से जब जीवनयापन किया जाता है, तब उद्वेगरूप प्रतिबंध की निवृत्ति द्वारा सेवा में आधिदैविकता संपादित होती है । अतः उपर्युक्त रीति के अनुसार सेवा करते हुए सभी प्रकार से शरणागति ही परमसाधन है ।

नवरत्न-ग्रंथ को प्रकाशित करनेवाले इन (प्रभुचरणों के) वचनों की मैंने यत्नपूर्वक उपासना की है ।

(अतः) व्रजभक्तों के हृदिस्थ श्रीकृष्ण की कृपा से मेरे युक्तविचार मेरे चित्त में स्थापित हों। एवं अयुक्तविचार सुखपूर्वक नष्ट हो जाएँ ॥ १ ॥

यह श्रीमद्वल्लभाचार्यचरणों में एकनिष्ठ पीतांबरात्मज 'पुरुषोत्तम' द्वारा किया गया 'नवरत्नविवृतिप्रकाश' संपूर्ण हुआ ।

नवरत्नम् ।

श्रीविट्ठलेश्वरविरचितप्रकाशसमेतम् ।



चिन्तासन्तानहन्तारो यत्पदाम्बुजरेणवः ।
स्वीयानां तान् निजाचार्यान् प्रणमामि मुहुर्मुहुः ॥ १ ॥

ननु भगवदीयानां कथं चिन्तोद्भवः । इत्थम् । आत्मनिवेदिनो हि भगवद्भजनार्हाः, नेतरे ।

श्रीकृष्णाय नमः ।

नवरत्नम् ।

श्रीविट्ठलेशात्मजश्रीवल्लभकृतप्रकाशटिप्पणी ।



चिन्तात्रयनिवृत्त्यर्थमुद्भिन्ननवरत्नकाः ।
समुज्वलीकृततदः प्रसीदन्तूभये मयि ॥ १ ॥

नवरत्नप्रकाशे । **चिन्तासन्तानेति** । यत्पदाम्बुजरेणवः समाश्रिता देहेन्द्रियादिकं शोधयन्ति, (वासनात्मकं लिङ्गं नाशयन्ती) त्यन्तःकरणशोधनद्वारा चिन्तानां वक्ष्यमाणानां सन्तानो वक्ष्यमाणप्रकारेण तन्निवर्तनेपि कुसृष्ट्युद्भावनं तद्धन्तार इत्यर्थः । ग्रन्थे चिन्ताः स्वयमेव निवर्तयिष्यन्ति, चित्ताशुद्धया कुसृष्ट्युद्भावनं तु चरणरेणुसमाश्रयनिवर्त्यमिति भावः । **नन्विति** । **किंप्रकारकचिन्तोद्भवः, सम्भवतीति** शेषः । **इत्थमिति** । ग्रन्थे वक्ष्यमाणास्तिस्रश्चिन्ता भगवदीयानामपि हीनमध्यमाधिकारिणां सम्भवन्तीत्यर्थः । ग्रन्थाद्भिन्नामप्येकां चिन्तां पूर्वोक्तेषु सम्भावितां स्वयमेव प्रमाणवाक्यैः समाधातुमाहुः **आत्मनिवेदिनो हीति** । एतन्निरासस्य प्रमाणवाक्यैः स्पष्टत्वान्मूलेऽकथनमिति भावः ।

तीन प्रकार की चिन्ता की निवृत्ति के लिए जिन श्रीमहाप्रभु ने नवरत्न प्रकट किए, एवं जिन श्रीविट्ठल ने उन्हें भलीभाँति उज्जवल किया, वे दोनों मुझ पर प्रसन्न हों ।

अब श्रीमत्प्रभुचरणों के नवरत्नप्रकाश में **चिन्तासन्तान** पद की व्याख्या की जाती है । जिनके चरणकमलों की रेणु आश्रितजनों के देह-इंद्रिय आदि को शुद्ध कर देती है, (अर्थात् देह-इंद्रिय के वासनात्मक स्वरूप को नष्ट कर देती है) और इस प्रकार अन्तकरण के शोधन द्वारा आगे कही जानेवाली चिंताओं की सन्तान, आगे कहे जाने वाले प्रकार द्वारा निवृत्त हो जाने पर भी, इन चिंताओं से भविष्य में उत्पन्न होने वाली जो कुसृष्टिरूप चिंताएँ हैं, उनको नष्ट करने वाली श्रीमदाचार्य चरणकमलों की रेणु है, यह अर्थ है। श्रीमदाचार्यचरण इस ग्रंथ में चिंताओं को तो स्वयं ही दूर करेंगे परंतु चित्त की अशुद्धि के कारण उत्पन्न होने वाली चिंताओं की कुसृष्टि तो श्रीमदाचार्यचरणकमलों की रेणु के आश्रय द्वारा ही दूर होगी, यह भाव है । अब **ननु** इत्यादि शब्दों की व्याख्या कर रहे हैं । इस पंक्ति का अर्थ है - भगवदीयों को किस प्रकार की चिन्ता उत्पन्न होती है ? । **इत्थम्** इत्यादि शब्दों का अर्थ यह है कि, इस ग्रंथ में आगे कही जाने वाली तीन प्रकार की चिन्ता भगवदीयों को भी हीन मध्यमाधिकार के भेद से होती है । परंतु ग्रंथ से भिन्न एक प्रकार की चिंता

इन तीनों अधिकारियों को हो सकती है । (देखें प्रभुचरणों की टीका के अंतर्गत 'तत्र च' से लेकर 'इतरेण वा' तक की पंक्ति का अनुवाद) जिसका समाधान करने के लिए प्रभुचरण स्वयं ही प्रमाणवाक्यों द्वारा **आत्मनिवेदिनो हि** इत्यादि शब्दों से कह रहे हैं । (टीकाकार का तात्पर्य वहाँ यह है कि यो तो इस नवरत्नग्रंथ में तीन प्रकार की चिंताओं अर्थात् आधिदैविक, आधिभौतिक एवं आध्यात्मिक चिंताओं का निवारण बताया गया है, जो तीनों प्रकार के अधिकारियों को हो सकती है परंतु इन तीन प्रकार की चिंताओं से भिन्न एक चौथे प्रकार की चिंता भी इन्हें हो सकती है, जिसका समाधान प्रभुचरणों ने स्वयं एकादश-स्कंध के प्रमाणवाक्यों द्वारा किया है । वह चिन्ता यह है कि सर्वस्व निवेदन कर देने के पश्चात् अब देहनिर्वाह कैसे करना ? क्या समर्पित किए धन से ? अथवा असमर्पित धन से ? यह अर्थ है।) ऐसी सर्वस्व समर्पण के पश्चात् देहनिर्वाह के लिए होती चिन्ता का तो एकादशस्कंध के "दारान् सुतान् (श्री.भा. ११/३/२८)" एवं 'धर्मैः मनुष्याणां (श्री.भा. ११/१९/२४)" इत्यादि प्रमाणवाक्यों से ही निराकरण हो जाता है अतः श्रीमदाचार्यचरणों ने मूलग्रंथ में इस चिंता का उल्लेख नहीं किया है, यह भाव है ।

तत्र चैहिकपारलौकिकयोरर्थयोर्नावशिष्टं किञ्चिदसमर्पितम् । एवं सति देहादिनिर्वाहः केन कार्यः, किं निवेदितार्थेन, उत इतरेण वा । तत्र नाद्यः । तदीयार्थस्य तदिच्छां विना ग्रहीतुमशक्यत्वात्, इच्छायाश्च ज्ञातुमशक्यत्वात् । वस्तुतस्त्विच्छायामपि सत्यां तदुपयोगोऽनुचितः सेवकस्य । न च तदीयानां देहादीनां तदीयार्थेन पोषणं न दोषायेति वाच्यम् । स्वतस्तथाकृतेर्दोषावहत्वात्तदिच्छायाश्च ज्ञातुमशक्यत्वादित्युक्तम् । न द्वितीयः, अस्वधर्मत्वात् ।

तत्र चेति । निवेदने जाते सत्यैहिकसुखसाधकानि स्त्रीपुत्रवित्तादीनि पारलौकिकसुखसाधकान्यग्निहोत्रादिकर्माणि भगवदीयान्येव जातानीत्यर्थः । एवं सतीति । वित्तसमर्पणे कृते सतीत्यर्थः । देहादीति । आदिपदेन गृहादिकम् । तथा च गार्हस्थ्यनिर्वाह इत्यर्थः । इतरेणेति । निवेदनात् पूर्वमेव स्थापितेनानिवेदितेनेत्यर्थः । अस्वधर्मत्वादिति । निवेदितस्य देहादेस्तदीयार्थेन पोषणं दोषावहमित्युक्तम् । अनिवेदितेन च पोषणमस्वधर्म इत्यर्थः ।

अब तत्र च इत्यादि शब्दों की व्याख्या कर रहे हैं । इस पंक्ति द्वारा प्रभुचरण यह कहना चाह रहे हैं कि, निवेदन हो जाने पर लौकिकसुख के साधक स्त्री-पुत्र-वित्त आदि एवं अलौकिक सुख के साधक अग्निहोत्र कर्म-आदि सभी भगवद्मय हो जाते हैं, यह अर्थ है । एवं सति इत्यादि शब्दों का अर्थ है, - धन का समर्पण कर देने के पश्चात् अब देह का निर्वाह कैसे करना ? अब देहादि शब्द की व्याख्या कर रहे हैं । देहादि में प्रयुक्त आदि पद से गृह एवं उससे संबंधित वस्तुओं का अर्थ लेना चाहिए । इसी प्रकार गृहस्थी का निर्वाह कैसे करना ? यह भी अर्थ लेना चाहिए । इतरेण शब्द का अर्थ यह है कि, क्या निवेदन करने के पहले जो अनिवेदित धन है, क्या उससे निर्वाह करना चाहिए ? अस्वधर्मत्वात् इत्यादि शब्दों की व्याख्या कर रहे हैं । भगवान से अपने देहादि का पोषण करना दोषयुक्त है एवं अनिवेदित वस्तुओं से स्वयं का पोषण करना अस्वधर्म है ।

निवेदितस्यार्थस्य स्थित्याद्यर्थं स्वस्य विचारस्याप्यनुचितत्वात् । तदभिमाने तत्सम्भवात् ।

दूषणान्तरमप्याहुः निवेदितस्यार्थस्येति । निवेदितपदार्थस्य देहगेहादेः स्थितिरादिपदेन तत्सम्बन्धीनि गृहादिकार्याणि विवाहादीनि च तदर्थं स्वस्य विचारोप्यनुचितः । तत्र हेतुः । तदभिमाने इति । स्थापनीये सतीति शेषः । देहे स्वकीयत्वाभिमाने स्थापनीये सत्येतादृशो विचारः सम्भवति । एतस्य तु देहे भगवदीयत्वमेव सम्पादनीयम्, अतः स्वस्य तद्विचारोनुचितः, भगवानेव विचारयिष्यतीति स्वस्येत्युक्तम् । तथा च देहस्थित्याद्यर्थं पूर्वमेव किञ्चित् पदार्थानिवेदनं नोचितमित्यर्थः ।

अन्य दूसरे प्रकार के दोष को प्रभुचरण निवेदितस्यार्थस्य इत्यादि शब्दों से कह रहे हैं । निवेदित हो चुके पदार्थ से देह-घर आदि की व्यवस्था एवं 'आदि' पद के द्वारा देह-घर से संबंधित दैनंदिनी गृहकार्य एवं विवाह-आदि के लिए प्रयत्न करने का हमारा विचार करना भी अनुचित है । इसका कारण प्रभुचरणों ने तदभिमाने इत्यादि शब्दों से कहा है, कि इस प्रकार स्वयं प्रयत्न करने से हममें अहंकार पैदा हो जायेगा । यदि देह में स्वकीयत्व का अभिमान रह गया हो, तभी ऐसा विचार हमारे मन में आ सकता है । ऐसे निवेदित जीव को तो देह में भगवदीयता ही संपादित करनी चाहिए अतः इस प्रकार स्वयं ही उद्यम करने का विचार भी अनुचित है । यह सभी कुछ भगवान विचारेंगे - यह बताने के लिए प्रभुचरणों ने स्वस्य पद कहा है । इसी प्रकार देहनिर्वाह के लिए निवेदन करने से पूर्व ही कुछ

पदार्थ अनिवेदित रख लें, यह उचित नहीं है - यह अर्थ है ।

एवं सति देहादिनाशसम्भवेन भजनासम्भवात्तद्वैयर्थ्यापातः । मार्ग एव चायमुच्छिद्येत । अतो निवेदने भजनाधिकारः, तस्मिन् सति तदनिर्वाह इत्युभयतः पाशा रज्जुरिति चेत् । अत्र वदामः । "दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम्" । "एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् । मयि सञ्जायते भक्तिः कोन्योर्थोस्यावशिष्यत" इत्यादिवाक्यैस्तदावश्यकम्, साक्षात् श्रीगोकुलेशभजनाधिकाररूपत्वात्, द्विजस्य वैदिककर्मणि गायत्र्युपदेशजसंस्कारवत् । (निवेदनस्य सार्थकत्वाय भजनसिद्ध्यर्थमावश्यकव्यवहारार्थं निवेदितस्यैव स्वार्थं विनियोगः कार्यः ।) अन्यथा दारपरिग्रहोत्तरक्षण एव तन्निवेदनेऽकृतेऽग्रे तदविनियोगे प्राप्ते तत्परिग्रहवैयर्थ्यापत्तिः । अपरंच । दाने हि न स्वविनियोगो, न तु निवेदने । अन्यथा निवेदितान्नादेर्भोजनं न स्यात् । अनिवेदितस्य निषिद्धत्वात् । निवेदितानामर्थानां भगवद्भोगार्थं विनियोगे जाते तदत्तप्रसादत्वेन स्वोपभोगकृतिरुचिततरा, दासधर्मत्वात् । 'उच्छिष्टभोजिनो दासा' इत्यादिवाक्यैः । आत्मशोधकत्वाच्च ।

एवं सतीति । पक्षद्वयप्रकारेणापि देहाद्यनिर्वाहे सतीत्यर्थः । तदावश्यकमिति । वाक्येषु निवेदनकथनात् सर्वनिवेदनमावश्यकम्, नतु पदार्थविनियोगेन बाधितमित्यर्थः । बाधितत्वे भगवान्न वदेदिति भावः । साक्षादिति । भजने सर्वाधिकारत्वोक्तावपि सत्त्वव्यवहितस्यैव भजने तथा । साक्षात् पुरुषोत्तमभजने तु निवेदिनामेवाधिकार इति भावः । अन्यथेति । निवेदितपदार्थस्य स्वयमग्रहणे दारानुपयोगोपि प्राप्येत, तथा च न तथेत्यर्थः । दाने हीति । पुत्रवित्तादिकं निवेदितम्, न तु दत्तमित्यर्थः । निवेदितोपभोगे प्रकारकथनायाहुः निवेदितानामित्यारभ्य शोधकत्वादित्यन्तम् । तथा चेयं चिन्ता तु प्रमाणवाक्यैर्युक्तिभिः परिशीलितैर्निजाचार्यपदाम्बुजरेणुसमाश्रयकृतचित्तशुद्धेः कुसृष्ट्यनुद्भावनेन च निवर्तते ।

एवं सति शब्दों का अर्थ है - इस प्रकार दोनों प्रकार के पक्षों से भी देहनिर्वाह करना असंभव है, तो ऐसी परिस्थिति में क्या करना ? (प्रभुचरणों की मूल टीका को ध्यान से पढें। ज्ञात होगा कि उन्होंने 'निवेदित पदार्थों से देहनिर्वाह करना या अनिवेदित पदार्थों से ?' इस प्रकार से दो पक्ष प्रस्तुत किए हैं । दोनों ही पक्षों से देहनिर्वाह करने में समस्या उत्पन्न हो रही है । टीकाकार यहाँ दोनों पक्षों की बात से यही बताना चाह रहे हैं।) अब **तदावश्यकम्** शब्दों की व्याख्या कर रहे हैं । उपर्युक्त श्रीमद्-भागवत के "दारान् सुतान् ....." इत्यादि श्लोक में प्रभु को निवेदन करना कहा गया होने से समस्त वस्तुओं का निवेदन आवश्यक है। निवेदन करने के पश्चात् भगवद्-मुक्त पदार्थों से यदि हम अपने देह-गेह का पोषण करें अर्थात् उन भगवद्-युक्त पदार्थों का विनियोग यदि हमारे देह-गेह में होता हो, तो इससे हमारा निवेदन बाधित नहीं होता । यदि इस प्रकार अपने देह-गेह के लिए उन भगवद्-युक्त पदार्थों का विनियोग करना बाधित होता तो भगवान ऐसा कहते ही नहीं । अब **साक्षात्** पद की व्याख्या कर रहे हैं । यद्यपि भगवान का भजन करने का अधिकार सभी जनों का कहा गया है परंतु फिर भी शरीरधारी ही भगवान का साक्षात् भजन कर सकते हैं और साक्षात् पुरुषोत्तम के भजन का अधिकार तो आत्मनिवेदियों का ही है, यह भाव है । **अन्यथा** शब्द की व्याख्या कर रहे हैं । अन्यथा इत्यादि शब्दों का अर्थ यह है कि, यदि समस्त वस्तुओं का भगवान में समर्पण करने के पश्चात् उन पदार्थों को हम स्वयं ग्रहण नहीं करेंगे तो फिर विवाहोपरांत पत्नी भी स्वयं के लिए उपयुक्त नहीं रह जाती है अतः 'निवेदित पदार्थ का उपयोग नहीं करना' ऐसा नहीं है, यह अर्थ है । अब **दाने हि** इत्यादि शब्दों की व्याख्या कर रहे हैं । पुत्र-धन आदि प्रभु को निवेदित किए गये हैं, दान नहीं किए गये हैं, यह अर्थ है । अतः निवेदित पदार्थों का उपभोग कैसे करना, यह प्रभुचरण 'निवेदितानां' इत्यादि शब्दों से आरंभ करके 'शोधकत्वात्' इस शब्द तक कह रहे हैं । अतः इस प्रकार से यह चिन्ता इन प्रमाणवाक्यों के द्वारा, उपर्युक्त युक्तियों के द्वारा, इनके परिचिंतन द्वारा और निजाचार्य श्रीमहाप्रभुजी के चरणकमलों की रेणु का भलीभाँति आश्रय करने के द्वारा शुद्ध हुए चित्त से एवं इन चिंताओं की कुसृष्टि उत्पन्न न होने से निवृत्त हो जाती है ।

---

१. () नास्ति बहुपुस्तकेषु ।

किन्तु प्रभौ निवेदितार्थस्य विनियोगे जातेऽग्रे तदर्थं यत्नः कार्यो, नवेति भवति चिन्ता । *तत्करणे बाहिर्मुख्यसम्भवः सेवाप्रतिबन्धश्च । 'त्रैवर्गिकायासे'तिवाक्यात् भगवत्कृतप्रतिबन्धश्च तत्र स्यात् । अकरणे निवेद्याभावेन भवति च दुःखम् । एवंभूतान् स्वानुपदिशन्ति चिन्ता कापि न कार्येति ।

चिन्ता कापि न कार्या निवेदितात्मभिः कदापि ।
भगवानपि पुष्टिस्थो न करिष्यति लौकिकीं च गतिम् ॥ १ ॥

अतोत्र समाधेयामन्यां चिन्तामाहुः **किन्त्वित्यारभ्य भवेति च दुःखमित्यन्तेन । एवंभूतानिति । यत्नकरणाकरणचिन्तायुक्तान् उभयपक्षसमाधायकवाक्येनोपदिशन्तीत्यर्थः । तत्र सामाधानं चिन्ता न कार्येति । पूर्वसिद्धानिषिद्धवृत्तौ सहजसिद्धयत्नकरणेपि तस्य यत्नस्य चिन्ता अनुचिन्तनं कथं इदं कार्यमिति मनसा सर्वथा तद्भावनं न कार्यमित्यर्थः । अग्रेपि वक्ष्यन्ति वाणिज्यादावास्थितौ तत्र विघ्न एव भवतीति । आस्थितिः कायवाङ्मनसां तदीयत्वम् । तथा चानास्थया यत्नकरणे पक्षद्वयोक्तोपि दोषो न भविष्यतीति भावः ।**

अतः समाधान करने योग्य अन्य दूसरी चिन्ता किंतु शब्द से आरंभ करके **भवति च दुःखम्** यहाँ तक के शब्दों द्वारा कही हैं । अब एवं भूतान् शब्द शब्द की व्याख्या कर रहे हैं । 'एवं भूतान्' शब्द से तात्पर्य यह है कि यत्नपूर्वक की जाने वाली चिन्ता एवं यत्न के बिना स्वाभाविक रूप से होनेवाली चिन्ता; ऐसे दोनों प्रकार की चिन्ता करने वालों को समाधान करने वाले वाक्यों द्वारा प्रभुचरण उपदेश कर रहे हैं । ऐसे जीवों की चिन्ता का समाधान वे **चिन्ता न कार्या** इत्यादि शब्दों से कर रहे हैं । यहाँ यह समझना चाहिए कि शास्त्रों द्वारा किसी अनिषिद्धवृत्ति द्वारा जीवनयापन करने में भले ही सहजरूप से किसी वस्तु को प्राप्त करने के लिए यत्न किया जा रहा हो तथापि उस यत्न की चिन्ता अर्थात् अनुचिंतन (वारंवार चिंतन करना) नहीं करना चाहिए । तात्पर्य यह कि "अब यह कैसे किया जाय ?" इस प्रकार से मन में विचार नहीं करना चाहिए । आगे भी प्रभुचरण यही कहेंगे कि यदि भगवान का आश्रय न करके जीव व्यापार आदि में आश्रित रहेगा तो वहाँ विघ्न ही होंगे । आश्रित हो जाने (आस्थितिः) का अर्थ यह है कि मन-वचन-कर्म से ऐसी वस्तु पर आधारित हो जाना । अतः यदि जीव इन सभी में आस्था न रखते हुए (और केवल भगवान पर आस्था रखते हुए) व्यापार-आदि में यत्न करे तो उपर्युक्त दोनों पक्षों (अर्थात् यत्नपूर्वक चिन्ता करनी एवं यत्न बिना स्वाविक रूप से होनेवाली चिन्ता) में दोष नहीं है, यह भाव है ।

लौकिकेतदभावेपि भगवदर्थापि सा न कार्या । एतदाहुः कापीतिशब्देन । अङ्गीकारेणैव सर्वं स्वत एव करिष्यतीति विश्वासो यतस्तस्यावश्यकः । भगवतोपि तथानियमः । कदाचित् परीक्षार्थं प्रारब्धभोगार्थं वा प्रभुश्चेद्विलम्बते, तदापि न कार्येत्याहुः कदापीति पदेन ।

लौकिकेति । स्त्रीपुत्रादिनिर्वाहकयत्नानास्थायामपि भगवन्नैवेद्यार्थकयत्ने आस्था सम्भवति, सापि न कार्येत्यर्थः । तत्राप्यास्थायां तत्सम्पादकेषु आस्थितिसिद्ध्या बाहिर्मुख्यं स्यादेवेति भावः । नन्वनास्थया कृतो यत्नो न सिध्येदित्याशङ्क्योत्तरार्थं सामान्यत आहुः अङ्गीकारेणैवेति । स्वस्यौदासीन्येपि भगवान् स्वाङ्गीकारेणैव हेतुना सर्वं यत्नं सिद्धं करिष्यतीत्यर्थः । विलम्बते इति । औदासीन्ये तत्कृतो यत्नः कदाचिन्न सिध्यति चेत्तथाप्यग्रिमयत्ने आस्था न कार्येत्यर्थः ।

---

* (किंच । तत्करणे बाहिर्मुख्यसम्भव इत्यारभ्योक्तचिन्ताभावायेदमत्र विचार्यते । सेवार्थं यत्नकरणे बाहिर्मुख्यं सेवाप्रतिबन्धश्च न सम्भवति । तस्य सेवाङ्गत्वेन तत्पूरकत्वात् तदकरणे तदसम्भवाच्च । नच 'त्रैवर्गिकायासे'ति वाक्यात्तत्र भगवत्कृतः प्रतिबन्ध इति वाच्यम् । त्रैवर्गिकपदवैयर्थ्यापत्तेः । अन्यथा आयासविघातमित्येतावतैव चरितार्थ्यं स्यात् । अतः स्वकीयानां त्रैवर्गिकायासविघातमेव भगवान् करोति, न स्वसेवार्थकायासविघातमिति निश्चीयते । अन्यथा यत्नमात्रस्य निषेधे भजनमार्ग एवोच्छिद्येत । नन्वात्मनिवेदिनामितरयत्नासम्भवेन तज्जनितचिन्ताऽभावात् कथं चिन्ता न कार्येत्युपदेश इति चेत् । अत्रेदं प्रतिभाति । भजनमार्गे हि भगवदङ्गीकारस्त्रिविधः । पुष्टिमर्यादाप्रवाहभेदेन । तत्रापि वै त्रैविध्यम् । तत्र पुष्टिपुष्टावङ्गीकृतस्य नेतरयत्नसम्भावनापि । परं मर्यादापुष्टौ प्रवाहपुष्टौ चाङ्गीकृतस्य तत्करणं मर्यादाप्रवाहांशः, तद्विघातः पुष्टयंशः । तथा चात्मनिवेदिनां मर्यादाप्रवाहसंबलितानां यथेतरयत्ने कृते बाहिर्मुख्यसेवाप्रतिबन्धतद्विघातादिकं भवति, तथा सेवार्थकेपि यत्ने भविष्यतीति भवति चिन्ता, अतस्तदभावाय तान् प्रति चिन्ता कापि न कार्येत्युक्तम् । अतः सेवार्थं यत्नः कर्तव्य एवेति नानुपपत्तिः काचित् ।) २. उपदिशन्तीत्यन्तेनेति पाठः । ३. लौकिकीति पाठः । ४. भोजनार्थमिति पाठः ।

अब **लौकिक** इत्यादि शब्दों की व्याख्या कर रहे हैं । यहाँ 'लौकिक.....कार्या' पंक्ति से प्रभुचरणों का तात्पर्य यह है कि स्त्रीपुत्रादि का निर्वाह करने के लिए जो प्रयत्न किया जाता है, उसमें कदाचित् भगवदाश्रय करने के कारण जीव को आस्था न भी हो परंतु स्वयं भगवान को निवेदन करने के लिए आवश्यक सामग्रियाँ जुटाने का यत्न करने में तो आस्था हो ही सकती है, परंतु यह भी नहीं करनी चाहिए, यह अर्थ है । वह इस कारण क्योंकि इसमें भी आस्था रखने से उन सामग्रियों का जुगाड़ करने में आपकी आस्था हो जायेगी और चित्त भगवान से हट जायेगा । अतः भगवान से हटकर इन सामग्रियों में आस्थिति हो जाने के कारण बहिर्मुखता तो आएगी ही, यह भाव है । किंतु यहाँ यदि कोई पूर्वपक्षी यह शंका करे कि, यदि किसी कार्य को पूर्ण करने में आस्था ही न हो, तो वह कार्य सिद्ध होगा ही कैसे ? तो इस आशंका का समाधान श्रीमहाप्रभु ने प्रथम श्लोक की दूसरी पंक्ति में दिया है, उसका अर्थ (उत्तरार्धार्थ) श्रीमत्प्रभुचरण सामान्यरूप से **अंगीकारेणैव** इत्यादि वाक्यों से कह रहे हैं । वे कहते हैं कि, जीव स्वयं इन यत्नों को करने में उदासीन भले ही हो, तथापि भगवान ने उसे अंगीकार किया होने के कारण वे उसके समस्त यत्नों को सिद्ध करेंगे, यह अर्थ है । अब **विलम्बते** इत्यादि शब्दों की व्याख्या कर रहे हैं । (इस पंक्ति के लिए प्रभुचरणों की टीका देखेंगे तो और स्पष्टता होगी) इस पंक्ति का अर्थ यह है कि, यदि जीव के उदासीन रहने पर भी उसके द्वारा किए गये प्रयत्नों से कार्य सिद्ध नहीं हो रहा है तो अब आगे प्रयत्न करने में भी उसे अन्य साधनों में आस्था नहीं रखनी चाहिए, यह अर्थ है ।

ननु लोकवत् कुटुम्बाद्यासक्त्या स्वस्यापि लौकिकीं गतिं कदाचित् प्रभुः कुर्यात्, तत्राहुः भगवानपीति । यतः पुष्टिस्थोऽतो मर्यादामार्गीयवैराग्याद्यभावेपि 'महापुरुषेण निवेदिता' इति स्वकीयत्वेनाङ्गीकारात् तथा न करिष्यतीत्यर्थः ॥ १ ॥

ननु लोकवदिति । लोकस्येव कुटुम्बासक्त्या भगवदङ्गीकारस्यासिद्धत्वेन लोकस्येव स्वस्यापि लौकिकीं लोकसदृशीं गतिमास्थापूर्वकं विचार्य यत्नकरणे एव तत्फलसिद्धिरन्यथा नेतिरूपां नीतिशास्त्रानुरोधेन कुर्यादित्यर्थः । यत इति । पुष्टिः प्रवाहो मर्यादा चेति मार्गत्रयम्, तन्मध्येऽत्र पुष्टिस्थो भगवान्, अतः कुटुम्बासक्त्या मर्यादामार्गीयवैराग्यादिसाधनाभावेपि पुष्टिमार्गीयेण महापुरुषाचार्यकृतनिवेदनेन स्वीयत्वाङ्गीकारं करिष्यति । तथा चाङ्गीकारस्य सिद्धत्वान्न लौकिकीं गतिं करिष्यतीत्यर्थः । भक्तस्य पुष्टिस्थत्वायापिशब्दः ॥ १ ॥

ननु लोकवत् इत्यादि शब्दों की व्याख्या कर रहे हैं । इस पंक्ति के द्वारा प्रभुचरण यह कहना चाह रहे हैं कि, लोक में दिखाई देती जीवों की लौकिक लोगों में आसक्ति की ही तरह निवेदक की भी कुटुंब-इत्यादि में आसक्ति होने के कारण भगवद्-अंगीकार सिद्ध नहीं हो पाता और इससे निवेदक को यदि यह शंका हो कि लोक की तरह हमारी भी लौकिकी/लोकसदृशगति प्रभु कर दें, तब क्या करना ? अर्थात् "लौकिककार्यों में आस्था रखते हुए विचारपूर्वक यत्नप्रयत्न करने से ही फलसिद्धि होगी अन्यथा नहीं" इस प्रकार से नीतिशास्त्र का अवलंबन करनेवाली हमारी बुद्धि प्रभु बना दें, तब क्या करना ? यह शंका होती है । इसी बात का स्पष्टीकरण श्रीमत्प्रभुचरण **यतः** इत्यादि वाक्यों से कर रहे हैं । पुष्टि-प्रवाह-मर्यादा इस प्रकार से तीन मार्ग हैं। इन तीनों मार्गों में हमारे प्रभु पुष्टिमार्ग में विराजमान हैं अतः जीव में कुटुंब-आदि की आसक्ति के कारण उसके पास मर्यादामार्गीय वैराग्य आदि अन्य दूसरे साधन न भी हों, तथापि वह पुष्टिमार्गीय है एवं महापुरुष-श्रीमहाप्रभुजी के माध्यम से निवेदित हुआ प्रभु का स्वीयजन है और इसी कारण प्रभु उसका अंगीकार अवश्य करेंगे । और, चूँकि इस प्रकार से उसका अंगीकार सिद्ध ही है, अतः उसकी लौकिकगति नहीं करेंगे, यह अर्थ है । इस प्रथम श्लोक में 'भगवान' शब्द के साथ 'अपि' शब्द जुड़ा होने का तात्पर्य यह है कि, ऐसे पुष्टिमार्ग में स्थित भगवान के शरणागत हुआ जीव भी 'पुष्टिमार्गीय' है, यह अर्थ है ॥ १ ॥

एवं चेत्, स्वाच्छन्यव्यवहारापत्त्या बाहिर्मुख्यं स्यादत आहुः निवेदनमिति ।

निवेदनं तु स्मर्तव्यं सर्वथा तादृशैर्जनैः ।
सर्वेश्वरश्च सर्वात्मा निजेच्छातः करिष्यति ॥ २ ॥

सर्वदा सर्वांशे[1] तदीयत्वानुसन्धानेन तथा न भविष्यतीति भावः । अशक्त्या सेवाद्यसम्भवेऽपीदं कार्यमेवेति ज्ञापनाय तुशब्दः।

एवं चेदिति । अनास्थायामविचारेपि फलसिद्धौ स्वाच्छन्येन बाहिर्मुख्यं भगवदननुसन्धानं भवेदित्यर्थः । तथा च यत्नानास्थया

१. शेन सर्वांशैः इति पाठः ।

समाहितो दोषः पुनः प्राप्त इति भावः । निवेदनस्मरणस्य स्वरूपमाहुः **सर्वदेति** । 'त्वयाभिगुप्ता विचरन्ति निर्भया' इति प्रकारकस्वाच्छन्येपि बाहिर्मुख्यं भगवदननुसन्धानं न भविष्यतीत्यर्थः । निवेदनानुसन्धानाभावे तु बाहिर्मुख्यं स्यादेव, अतस्तदावश्यकमिति भावः । **सेवादीति** । **आदि**पदेन कथा, तदसम्भवेपीत्यर्थः । अनायासेन फलसिद्धौ स्वाच्छन्येन प्राप्तस्य बाहिर्मुख्यदोषस्य निवारणार्थं निवेदनानुसन्धानमुक्तम् । फलासिद्धावपि तदनुसन्धानं कार्यमेवेत्यपिशब्दः ।

अब एवं चेत् इत्यादि शब्दों की व्याख्या कर रहे हैं । इस पंक्ति से आपश्री का तात्पर्य यह है कि, जीव यदि लौकिक प्रयासों को करने आस्था न रखे और अपने कार्य को सिद्ध करने में खुद बहुत अधिक विचारविमर्श न करे और यदि तब भी फलसिद्धि हो जाय (अर्थात् काम बन जाय) तो उसमें स्वच्छंदता आ जाती है एवं भगवान का अनुसंधान छूट जाता है । ऐसी परिस्थिति में तो हुआ यह कि, लौकिक प्रयत्नों में आस्था न रखने से भी यदि कार्य सिद्ध हो गया तो जीव में स्वच्छंदता की वृत्ति पनप गई । अर्थात् जिस लौकिकगति से बचने के लिए हमने यह सब उपाय किए थे, वह दोष तो पुनः आ गिरा, यह भाव है । निवेदन का स्मरण किस प्रकार से करना चाहिए यह प्रभुचरण सर्वदा पद से कह रहे हैं । अर्थात् "हे माधव ! आपसे हृदयबद्ध कभी भी मार्गभ्रष्ट नहीं होते । आपसे रक्षित विघ्नकर्ताओं के मस्तक पर पैर रखकर निर्भय विचरण करते हैं (श्री.भा. १०/२/३३)" इस श्लोक में कहे प्रकार जैसी स्वच्छंदता होने पर भी बहिर्मुखता एवं भगवान का अनुसंधान न करने जैसे दोष नहीं होंगे, यह अर्थ है । यदि निवेदन का अनुसंधान न हो तो बहिर्मुखता तो होती ही है अतः निवेदन का अनुसंधान आवश्यक है, यह भाव है । अब **सेवादि** इत्यादि शब्दों की व्याख्या करते हैं । इस पद में कहे 'आदि' पद से प्रभुचरणों का तात्पर्य कथा में है; अर्थात् यदि कथा करनी भी असंभव हो तो भी निवेदन का स्मरण तो आवश्यक है ही, यह भाव है । जहाँ जीव किसी भी कार्य के लिए स्वयं प्रयत्नशील न रहकर सभी कुछ भगवान पर छोड़ देता है, वहाँ उसमें स्वच्छंदता आ सकती है और बहिर्मुखता का दोष आ सकता है । अतः इसका निवारण करने के लिए निवेदन का अनुसंधान करना कहा गया है । फलसिद्धि हो जाने पर भी इसका अनुसंधान तो करना ही चाहिए, यह बताने के लिए प्रभुचरणों ने 'अपि' शब्द का प्रयोग किया है ।

चकारपक्षे समुच्चयः । सर्वथेत्यस्यावश्यकत्वज्ञापनाय । अथवा । सर्वथा ये तादृशा निवेदितात्मत्वेन तत्परास्तैः सह तथा । एतेन सङ्गदोषो निवारितः । अतादृशेष्वेतद्दोषनं सूच्यते । सर्वदेतिपाठे कालापरिच्छेदस्तत्रोच्यते । अन्यथा तदैवासुरप्रवेशः स्यादिति भावः । कदाचिदलौकिकार्यस्य लौकिकस्य वा सिद्ध्यर्थं प्रभुः प्रार्थनीय इति प्रश्ने नेत्याहुः सर्वेश्वर इति । अत्र सर्वशब्दो निवेदितात्मसर्वपरः । यथा 'सर्वे ब्राह्मणा भोजयितव्या' इत्यत्र निमन्त्रिता एव सर्वपदेनोच्यन्ते, न त्वन्येपि । सर्वात्मपदेप्येवं ज्ञेयम् । तेन सेवकाः [१]सर्वे [२]यथा यथा प्रपन्नाः, तथा तथा प्रभुरपि तेष्वङ्गीकृतस्वामित्व आत्मीय[३]त्वमेव तेषु मनुत इति तद्धितकृतौ न प्रार्थनामपेक्षत इति ज्ञाप्यते । अथवा । कालादिनियामकत्वेन न तत्कृतोपि प्रतिबन्धसम्भव इच्छायामिति ज्ञापनाय सर्वपदं कालादिपरम् । प्रार्थितोपि स्वविचारितमेव करिष्यतीति प्रार्थनाप्यप्रयोजिकेति ज्ञापनाय निजेच्छेत्युक्तम् । अथवा । निजाः स्वीयत्वेनाङ्गीकृताः सेवकास्तेषां प्रचुरेच्छातः स्वयमेवापेक्षितं करिष्यतीति न प्रार्थनापेक्षेत्यर्थः । परन्त्विच्छाया अविकृतत्वमेवापेक्षितमिति ज्ञापनायाव्ययप्रयोगः ॥ २ ॥

चकारपक्षे सर्वथेति पदेनावश्यकत्वं बोधितम् । तुशब्दपक्षे आवश्यकत्वं तेनैव बोधितमिति सर्वथापदस्य समासेनाग्रेऽन्वयमाहुः अथवेति । आसुरप्रवेश इति । 'द्वया ह प्राजापत्या'इत्यत्र वागादीनां स्वार्थमुद्गानात् पापवेधः, आसन्यस्य भगवदर्थमुद्गानात्तदभाव इति तृतीयाध्याये वेधाद्यर्थभेदादित्यधिकरणे भाष्ये विवृतम्, अतो यस्मिन्नेव काले भगवदीयत्वविस्मरणम्, तदैव देहादावासुरधर्मप्रवेशो भवतीत्यर्थः । तेन बाहिर्मुख्यं भवेदेवेति भावः । आत्मीयत्वमेवेति । भगवतस्तदात्मत्वकथनेन तेषामात्मीयत्वमुक्तम् । स्वामित्वं भगवन्निष्ठो धर्मः सर्वेश्वरपदस्यार्थः । आत्मीयत्वं भक्तनिष्ठो धर्मः सर्वात्मपदेनोक्तः । सर्वपदस्य कालवाचकत्वपक्षे कालनिष्ठो ज्ञेयः ।

यदि मूल कारिका में 'तु' शब्द के स्थान पर पाठभेद से 'च' शब्द मान लिया जाय तो आचार्यचरण 'सर्वथा' पद के द्वारा निवेदन की आवश्यकता बता रहे हैं, यह समझना चाहिए । यदि 'तु' शब्द मान लें, तब तो स्वयं 'तु' शब्द से ही निवेदन की आवश्यकता बोधित हो रही है । 'सर्वथा' पद का तात्पर्य श्रीप्रभुचरणों ने 'अथवा' शब्द के पश्चात् 'सर्वथा.....तथा' इस पंक्ति में स्पष्ट किया है । अब आसुरप्रवेश इत्यादि शब्दों की व्याख्या कर रहे हैं । "प्रजापति के दो पुत्र थे, देव और असुर (बृहदा. १/३/१)" इस श्रुति के विवरण में कहा गया है कि, जब देव और असुरों का युद्ध हुआ, तब असुरों को पराजित करने के लिए देवता ने वाणी, प्राण, चक्षु, श्रोत्र एवं

---

१. सर्वात्मनेति पाठः । २. सर्वदा इति पाठः । ३. आत्मत्वमिति पाठः ।

मन इत्यादि की उपासना की परंतु असुरों ने इन्हें पापयुक्त कर दिया । इसके पश्चात् जब देवताओं ने भगवान के लिए प्राणों से उपासना की तो उसे वे पापयुक्त न कर सके । (विशेष जानने के लिए बृहदारण्यक उपनिषद् में यह प्रसंग पढ़ें) । यह सभी कुछ ब्रह्मसूत्र के तीसरे अध्याय में "वेधाद्यर्थभेदात्" (३/३/२५) इस सूत्र के भाष्य में विवृत किया गया है । अतः जिस काल में भगवदीयता का विस्मरण हो जाता है, तब ही देहादि में असुरधर्म का प्रवेश होता है, यह अर्थ है और इससे बहिर्मुखता होती ही है । अब **आत्मीयत्वमेव** शब्द की व्याख्या कर रहे हैं । शरणागत जीवों को 'आत्मीय' इस कारण से कहा है क्योंकि भगवान उनकी आत्मा कहे गये हैं । और, भगवान में चूँकि स्वामित्व का धर्म विद्यमान है, अतः वे सर्वेश्वर कहे जाते हैं । और भक्त में भगवान के प्रति रहनेवाला आत्मीयता का धर्म विद्यमान है, अतः भगवान 'सर्वात्म' पद से कह गये हैं । जहाँ पर 'सर्व' शब्द का अर्थ काल किया गया है वहाँ - काल भी स्वयं भगवान में स्थित है अतः वे काल के भी स्वामी हैं - इस प्रकार से अर्थ जानना चाहिए ॥ २ ॥

ननु भगवते समर्पितदेहादेः स्त्रीपुत्रादिषु विनियोगेन स्वधर्महानिचिन्ता बाधते, तत्राहुः सर्वेषामिति ।

सर्वेषां प्रभुसम्बन्धो न प्रत्येकमिति स्थितिः ।
अतोन्यविनियोगेपि चिन्ता का स्वस्य सोपि चेत् ॥ ३ ॥

~~स्वात्मना सह यावत्तो निवेदितस्तैः सहैव स्वीकरणात् सेवां सर्वेषामेव प्रभुसम्बन्धो न न, प्रत्युत्तत्र तत्सौहृदि~~
तत्रोपयोगे स्वस्य का चिन्ता, न कापीत्यर्थः ।

स्वधर्मेति । स्वधर्मो निवेदनम्, तस्य हानिरित्यर्थः । स्वात्मना सहेति । प्रत्येकं प्रभुसम्बन्धे यावत्तत्सम्बन्धानामनङ्गीकारस तत्तत्सम्बन्धयुक्ते स्त्रीपुत्रादौ स्वस्य विनियोगे दोषः स्यात्, अत्र तु सहैवाङ्गीकारात् सेवानवसरे अनिषिद्धप्रकारेण भार्याद्युपयोगे स्वधर्महानिरित्यर्थः । प्राधान्यादिति । प्राधान्याद्धेतोः स्वस्यैव नेत्यर्थः । का चिन्तेति । अभगवदीयसंसर्गे हि स्वधर्महा तेषामप्यङ्गीकृतत्वान्न तथेत्यर्थः । तथा च भगवदीयत्वानुसन्धानेन तेषु व्यवहर्तव्यम्, न तु स्वकीयत्वाभिमानेनेति भा वित्तादिवद्भार्यादीनामपि समर्पणम् । परमेतावान् विशेषः । भार्यादिदेहे यथैतस्य सम्बन्धः, तथा तत्तज्जीवानामपि सम्बन्धोस्ति, अत तत्तन्निष्ठस्वसम्बन्धसमर्पणे कृतेपि तत्तज्जीवसत्तासमर्पणार्थं भिन्नभिन्नतया तत्तत्कृतसमर्पणमपेक्षितम् एतत्कृतसमर्पणेनैतन्निरूपिततत्सम्बन्धः समर्पितो भवति, स्वस्वसहजादिदोषपञ्चकनिवृत्तिस्तु स्वस्वकृतसमर्पणेन भवति । वित्त त्वन्यसत्ताभावादेतत्कृतसमर्पणेनैव निर्दुष्टत्वसिद्धिरिति ।

अब **स्वधर्म** इत्यादि शब्दों की व्याख्या कर रहे हैं । भगवान को सर्वस्व निवेदन कर देना ही स्वधर्म है और यदि निवेदन क के पश्चात् जीव के देह-अदि का विनियोग प्रभु में न होकर स्त्री-पुत्रादि में होता है तो उस निवेदन की हानि होती है, यह अर्थ अब **स्वात्मना सह** इत्यादि शब्दों की व्याख्या कर रहे हैं । प्रत्येक जीव का प्रभुसंबंध होने पर जब तक उससे संबंधित लोगों क ने अंगीकार नहीं किया है तब तक उन-उन सबंधों से युक्त स्त्रीपुरुष-आदि में स्वयं का विनियोग होने पर दोष है, परंतु यहाँ तो उन के संग प्रभु ने हमारा अंगीकार किया है अतः सेवा के अनवसर काल में शास्त्रोक्त (मनुस्मृति जैसे शास्त्रों में गृहस्थजीवन के विष निषिद्ध एवं अनिषिद्ध प्रकारों का वर्णन आता है । उदाहरण के रूप में देखें मनुस्मृति की तीसरा अध्याय) अनिषिद्ध प्रकार से पत्नी- का उपयोग करने पर भी स्वधर्म की हानि नहीं होती है, यह अर्थ है । अब **प्राधान्यात्** शब्द की व्याख्या करते हैं । अर्थात् प्रधा से केवल स्वयं का ही निवेदन हुआ है, ऐसा नहीं है, यह अर्थ है । **का चिन्ता** इत्यादि शब्दों की व्याख्या कर रहे हैं । अभगवदीय संसर्ग होने पर ही स्वधर्म की हानि होती है परंतु परिवारजनों का भी अंगीकार तो हुआ ही है, सो वे अभगवदीय नहीं हैं अतः उनका होने पर स्वधर्म का हानि नहीं होती है, यह अर्थ है । उनमें भगवदीयता का अनुसंधान रखते हुए ही उनसे व्यवहार करना चाहिए; वे परिवारजन हैं इस प्रकार से अभिमानपूर्वक नहीं । धन की ही भाँति पत्नी-आदि का भी भगवान में समर्पण हुआ ही है परंतु यहाँ विशेष अवश्य है कि जिस प्रकार से जीव का पत्नी-आदि की देह से संबंध है, उसी प्रकार उन-उन जीवों का भी अन्यत्र कहीं तो है ही । अतः उन-उन जीवों में रहे हुए अपने संबंध का प्रभु में समर्पण कर भी दिया जाय तथापि उन-उन जीवों की अपनी की सत्ता का समर्पण करने के लिए उनके अपने द्वारा पृथकरूप से किया गया समर्पण तो आवश्यक ही है । इस जीव के द्वारा किए समर्पण से तो उससे संबंधितों का समर्पण हुआ, परंतु अपने-अपने सहज-आदि पाँच प्रकार के दोषों की निवृत्ति तो अपने-अपने

किए गये समर्पण से ही होगी । अपने धन-आदि में तो अन्य किसी दूसरे की सत्ता न होकर खुद अपनी ही सत्ता है अतः जीव के समर्पण के द्वारा ही वह धन निर्दुष्ट हो जाता है ।

इयं निवेदनेऽङ्गीकारमर्यादित्याहुः स्थितिरिति । कस्यचिद्विशेषतोङ्गीकारश्चेत्, सा पुष्टिरिति भावः ।

इयमिति । सर्वनिष्ठसम्बन्धैः सह स्वस्याङ्गीकार इत्यर्थः । विशेषत इति । निवेदकस्यैवाङ्गीकारस्तन्निष्ठकिञ्चिन्निरूपितसम्बन्धस्य नेति चेत्, सा पुष्टिः मर्यादातिक्रमो भगवतो नियन्तुमशक्यत्वादित्यर्थः । तदा तादृशे स्वदेहविनियोगो न कार्यः । अत एव 'प्रतिकूले गृहं त्यजे'दिति वाक्यम् । अस्मिन् पक्षे अन्यत्र स्त्रीपुत्रादौ विनियोगे स्वस्य देहस्येत्यर्थः ।

इयम् इत्यादि शब्दों की व्याख्या कर रहे हैं । 'इयम्' से लेकर 'स्थितिरिति' तक की पंक्ति का भावार्थ यह है कि - अपने समस्त सगे-संबंधियों के संग अपना अंगीकार प्रभु करते हैं । अब विशेषतः इत्यादि शब्दों की व्याख्या कर रहे हैं । यहाँ यह समझना चाहिए कि यदि निवेदक का केवल स्वयं का ही अंगीकार हुआ हो उससे संबंधित और किसी का नहीं तो इसे पुष्टि समझना चाहिए अर्थात् इस परिस्थिति में भगवान ने निवेदन की मर्यादा का अतिक्रमण किया है । क्योंकि भगवान को किसी भी मर्यादा के नियम में बाँधा नहीं जा सकता । (क्योंकि निवेदन की मर्यादा तो यह है कि, भगवान निवेदक के संग उसके सगे-संबंधियों का समर्पण भी स्वीकार कर लेते हैं एवं उनको भी अंगीकार करते हैं परंतु यदि भगवान किसी विशेष परिस्थिति में केवल निवेदक को ही अंगीकार करें और उसके सगे-संबंधियों को नहीं, तो वहाँ भगवान ने निवेदन की मर्यादा का अतिक्रमण करके उस निवेदक पर ही कृपा (पुष्टि) की है, यह समझना चाहिए । अब प्रश्न यह उठता है कि इसका पता कैसे चले कि भगवान ने केवल उस निवेदक को ही अंगीकार किया है, उसके सगे-संबंधियों को नहीं ? कई बार ऐसा देखा जाता है कि पूरे परिवार में किसी एक व्यक्ति को पुष्टिप्रभु में भाव होता है । और वह भगवत्सेवा की ओर तत्पर रहता है। उसके अन्य सभी परिवारजन या तो अन्यमार्गीय होते हैं , या बहिर्मुख होते हैं। या तो फिर उसकी भगवत्सेवा में विघ्न पैदा करते हैं। इन सभी लक्षणों से जाना जा सकता है कि प्रभु ने केवल उसी व्यक्तिविशेष को अंगीकार किया है अन्य किसी को नहीं) तब ऐसे बहिर्मुख एवं प्रभु द्वारा अंगीकार न किए गये सगे-संबंधियों से अपना लौकिक व्यवहार नहीं रखना चाहिए। इसी कारण आचार्यचरणों ने "यदि पत्नीपुत्र-आदि हमारे भगवद्-धर्म से प्रतिकूल हों, तो गृहत्याग कर देना चाहिए। जहाँ तक ऐसी परिस्थिति का प्रश्न है तो वहाँ ये समझना चाहिए कि, स्त्री-पुत्र आदि का भगवान में विनियोग न होकर अन्यत्र कहीं विनियोग होता हो तो इसमें अपने देहनाश की चिन्ता क्यों करनी चाहिए, यह अर्थ है ।

अथवा । पुत्रादीनामन्यविनियोगदर्शनेपि स्वस्य का चिन्ता, तेषामप्यङ्गीकारेणैव कृतार्थतासम्भवादित्यर्थः ।

अन्यविनियोगेति । अन्यत्र लौकिके स्वस्त्रीपुत्रादिकार्ये विनियोगदर्शनेपि तेषां निवेदनहानिजनितचिन्ता स्वस्य केत्यर्थः । तेषामपीति । स्वाङ्गीकारेणैव क्रमेण तेषामपि कृतार्थता सम्भवति । अधुना अतथाभावेप्येकाङ्गेन भगवत्सम्बन्धात् तदनुभावेनैवास्मिन् जन्मनि जन्मान्तरे वा तथा बुद्धया स्वस्वकृतसमर्पणेन स्वस्वसहजादिदोषनिवृत्त्या कृतार्थता सम्भवतीत्यर्थः । अङ्गीकृतस्य सर्वांशे भगवानेव चिन्तां करोतीति स्वस्येत्युक्तम् । स्वस्य त्वधुनैव सहजादिदोषनिवृत्त्या कृतार्थता सिद्धा, क्रमेण तेषामपि सम्भवतीत्यपिशब्दः ॥ ३ ॥

अब अन्यविनियोग इत्यादि शब्दों की व्याख्या करते हैं । यहाँ पुत्रादीनां से लेकर इत्यर्थः तक की पंक्तियों का अर्थ यह है कि, यदि स्वयं स्त्री-पुत्र आदि का भगवान में विनियोग न होकर अन्यत्र किसी लौकिक कार्यों में विनियोग होता दिखाई पड़े, तब भी 'उनका निवेदन व्यर्थ हो गया' इस प्रकार की चिन्ता हमें क्यों करनी चाहिए ? यह अर्थ है । क्योंकि अंगीकार हो जाने के द्वारा ही क्रम से उनकी भी कृतार्थता हो जायेगी, यह अर्थ है । वर्तमान में भले ही उनमें भगवान के प्रति ऐसा भाव न हो तथापि हमारे द्वारा उनका भी भगवत्सबंध तो हुआ ही है अतः इस बात से निरंतर भगवद्-अनुसंधान रखते हुए यह विचार करना चाहिए कि इस जन्म में या अगले जन्म में भी जब वे अपना-अपने पृथक् समर्पण करेंगे, तब उनके भी अपने-अपने सहज आदि दोषों की निवृत्ति के द्वारा उनकी भी कृतार्थता हो जायेगी,

---

१. निवेदिनोऽङ्गीकारेतिपाठः ।

यह अर्थ है । जो भगवान द्वारा अंगीकृत हुए हैं, उनके लाभ-हानि की चिन्ता सर्वांश में भगवान ही करते हैं - यह बताने के लिए स्वस्य पद कहा गया है । खुद की तो वर्तमान में ही (अर्थात् स्वयं के निवेदन कर लेते ही) सहज-आदि दोषों की निवृत्ति के द्वारा कृतार्थता सिद्ध हो जाती है और हम से संबंधित स्त्री-पुत्र आदि परिवारजनों की भी कृतार्थता क्रम से सिद्ध हो जाती है, यह प्रभुचरणों ने 'अपि' शब्द द्वारा कहा है ॥ ३ ॥

किञ्च । स्वस्येतिपदमावृत्तमपिशब्देन सम्बध्यते ॥ ३ ॥

यथा पुत्रादीनाम्, तथा स्वस्यापि सः अन्यविनियोगश्चेत्, तदापि चिन्ता न कार्येत्याहुः अज्ञानादिति ।

अज्ञानादथवा ज्ञानात् कृतमात्मनिवेदनम् ।
यैः कृष्णसात्कृतप्राणैस्तेषां का परिदेवना ॥ ४ ॥

हीनमध्यमाधिकारिभिरपि निवेदितात्मभिश्चिन्ता न कार्या भवति यत्र, तत्र कृष्णसात्कृतप्राणैश्चिन्ता न कार्येति किमु वाच्यमित्यर्थः । केवलं प्रभ्वधीनीकृतप्राणानां चिन्ताविषयाभावादेव न सेति भावः । अत एव केतिशब्द उक्तः । पदसम्बन्धस्तु अज्ञानादथवा ज्ञानाद्यै-स्तत्कृतम्, तेषां सा नेतिशेषः । कृष्णसात्कृतप्राणैर्यैस्तत्कृतम्, तेषां सा केत्युक्तम् ॥ ४ ॥

एतमेव पक्षमाश्रित्याग्रिमश्लोकाभासमाहुः किञ्चेति । प्रथमपक्षे स्वस्य स्वकीयस्य स्त्रीपुत्रादेरपीत्यग्रिमश्लोकव्याख्याने इत्यर्थः । केवलेति । भगवदधीनजीवनानां सर्वांशे भगवदीयत्वेन विषयाः सर्वे भगवदीया एवेति भोग्यविषयेषु स्वीयत्वेनाभिमानाभावात् सा पक्षद्वयभेदेन स्वान्यविनियोगजनिता पुत्राद्यन्यविनियोगजनिता वा चिन्ता नास्त्येव, किन्तु हीनमध्याधिकारिणामपि तदभावार्थं बोध्यत इति भावः । चिन्ताभावे हेतुः पूर्वोक्त एव सर्वेषां प्रभुसम्बन्धो ज्ञेयः । आद्यव्याख्याने पूर्वं स्वान्यविनियोगचिन्ता, द्वितीये पुत्राद्यन्यविनियोगचिन्तोक्ता । द्वितीयव्याख्याने इदं विपरीतमिति विभेदः । तेषां सा नेति । स्वपदस्य स्वकीयवाचकत्वपक्षे सा स्त्रीपुत्रादिविषयिणी चिन्ता नेत्यर्थः । निवेदनपदार्थो न नश्यति, विलम्बस्तु भवत्येवेति ज्ञेयम् ॥ ४ ॥

इस पक्ष के संग (अर्थात् 'कालांतर में अन्य परिवारजनों' की कृतार्थता भी हो जायेगी इस पक्ष को लेकर) श्रीमत्प्रभुचरण अग्रिम श्लोक का विवरण किञ्च इत्यादि शब्दों से कह रहे हैं । श्रीमत्प्रभुचरणों द्वारा किए गये 'स्वस्य' पद के दो अर्थों में से पहले पक्ष का अर्थ - अपने स्वकीयजनों अर्थात् स्त्रीपुत्र-आदि का भी अन्यविनियोग होने पर चिन्ता नहीं करनी - इस प्रकार से है ।

अब केवल इत्यादि शब्दों की व्याख्या कर रहे हैं । इस पंक्ति का अर्थ यह है कि, स्वयं का जीवन भगवान के अधीन कर चुके ऐसे जीव चूँकि सर्वांश में भगवदीय होते हैं अतः उनके सभी लौकिक-अलौकिक विषय भी भगवदीय ही होते हैं और इसी कारण भोग्य विषयों में उन्हें स्वीयत्व का अभिमान नहीं होता । इसी कारण अपना अन्य विनियोग होने से उत्पन्न होने वाली चिन्ता; या फिर पुत्र आदि परिवारजनों का अन्य विनियोग होने से उत्पन्न होनेवाली चिन्ता; ऐसे दोनों पक्षों से होने वाली चिन्ता उनको तो नहीं ही होती है परंतु ऐसी दोनों प्रकार की चिंता हीन-मध्यम अधिकारियों को भी नहीं होती है, यह बोध करा रहे हैं, यह भाव है । चिन्ता न होने हेतु तो पूर्व में ही "स्वयं के सहित अन्य सभी का भी प्रभुसंबंध हो जाता है (सर्वेषां प्रभुसंबंधः)" इस वाक्य के द्वारा समझ लेना चाहिए । यहाँ श्रीप्रभुचरणों ने "अथवा" से पहले के व्याख्यान में निवेदक का लौकिक स्त्री-पुत्र-आदि में विनियोग होने से उत्पन्न हुई चिंता के विषय में विचार किया है । और 'अथवा' शब्द के पश्चात् द्वितीय व्याख्यान में आपश्री ने अपने स्त्रीपुत्रादि का भगवान में विनियोग न होकर अन्यत्र लौकिक में होता देखकर निवेदन को होने वाली चिंता का विचार किया है । दोनों प्रकार के व्याख्यानों में यही भेद है । अतः ज्ञान अथवा अज्ञान से जैसे भी आत्मनिवेदन किया हो, उनको ऐसे किसी भी प्रकार चिंता नहीं होनी चाहिए, यह तेषां सा न इत्यादि शब्दों से प्रभुचरण कह रहे हैं । यहाँ यह समझना चाहिए कि 'स्वस्य' पद का जहाँ अर्थ - 'स्वयं से संबंधित स्त्रीपुत्र आदि के विषय की चिन्ता नहीं करनी चाहिए' - इस प्रकार से किया गया है, वहाँ उस पक्ष में - "अपने स्त्रीपुत्र आदि के विषय की चिंता नहीं करनी चाहिए" - इस प्रकार से अर्थ लेना चाहिए । फलप्राप्ति में विलंब तो होता ही है परंतु निवेदन करना व्यर्थ ही जाए, यह संभव नहीं है ॥ ४ ॥ (इस वाक्य से टीकाकार कह कहना चाह रहे हैं कि चूँकि जीव के निवेदन के संग-संग उसके अंगभूत स्त्रीपुत्र आदि का भी परोक्षतया समर्पण तो हो ही चुका है अतः वह तो व्यर्थ नहीं जायेगा परंतु उन सभी का उस निवेदनकर्ता के अंगत्वेन एवं परोक्षरूप से समर्पण हुआ है अतः उनके कृतार्थ होने में विलंब तो होगा ही । भाव यह कि, जब वे स्वयं पृथक-पृथक रूप से समर्पण करेंगे, तब वे भी कृतार्थ हो जायेंगे। परोक्षतया किया गया निवेदन भी व्यर्थ नहीं जायेगा, यह अर्थ है।)

ननु सख्यात्मनिवेदने हि भगवदङ्गीकारेणैव सम्पद्येते, तथा च स्वयमात्मनिवेदने कृतेपि प्रभुरङ्गीकृतवान्नवेति चिन्ता भवत्येव, इत्यत आहुः **तथेति** ।

तथा निवेदने चिन्ता त्याज्या श्रीपुरुषोत्तमे ।
विनियोगेपि सा त्याज्या समर्थो हि हरिः स्वतः ॥ ५ ॥

पुरुषोत्तमोङ्गीकृतवान्नवेति निवेदनविषयिणी या सा त्याज्या उक्तनिवेदनवदित्यर्थः ।

इति निवेदनविषयिणीति । इति असम्पत्तिप्रकारेण निवेदनविषयिणीत्यर्थः । पूर्वोक्तापि निवेदनविषयिण्येव, परं हानिप्रकारेणोक्तेति भावः । पूर्वोक्तमेव समाधानमत्रापि ज्ञेयमित्याहुः उक्तनिवेदकवदिति । **मूलस्थतथेति**पदस्यार्थोयम् । सप्तम्यर्थे वतिः । यथा निवेदके, तथा पुरुषोत्तमे इति मूलानुसन्धानेनार्थः । तथा च यथा पूर्वश्लोकोक्तरीत्या निवेदककृतान्यविनियोग-हेतुकनिवेदनहानिचिन्ता त्याज्या, तथा भगवत्कृताङ्गीकाराभावहेतुकनिवेदनासम्पत्तिचिन्तापि त्याज्येत्यर्थः ।

अब **निवेदनविषयिणी** इत्यादि शब्दों की व्याख्या करते हैं । इसका भाव यह है कि, 'निवेदन करने के पश्चात् पुरुषोत्तम ने स्वीकार किया या नहीं ?' इस प्रकार की चिन्ता निवेदनविषयिणी चिन्ता है । पूर्व में कही गई चिन्ता भी निवेदनविषयिणी ही है, परंतु उस चिन्ता में स्वयं का या परिवारजनों का अन्य विनियोग होने से निवेदन की हानि हो जाने की चिन्ता का प्रकार बताया था किंतु यहाँ तो 'निवेदन के पश्चात् प्रभु ने स्वीकार किया या नहीं ?' इस प्रकार की निवेदन-विषयक चिंता है । वहाँ इस चिन्ता का जो समाधान दिया था, वही समाधान यहाँ भी जानना चाहिए, इस कारण से प्रभुचरणों ने यहाँ **उक्तनिवेदकवत्** कहा है । यह मूलग्रंथ के पाँचवें श्लोक में प्रयुक्त हुए "तथा" पद का अर्थ है । अर्थात् मूल श्लोक में आए 'तथा' पद से भी आचार्यचरणों का तात्पर्य उन तीन प्रकार के निवेदकों द्वारा निवेदन करने से ही है । अतः अब अर्थ यह बनेगा कि - अज्ञान से निवेदन किया गया हो या ज्ञान से अथवा तो कृष्ण के साथ अपने प्राण आत्मसात करने के पश्चात् किया गया हो, चिन्ता तो किसी भी परिस्थिति में नहीं करनी चाहिए यह अर्थ है । 'निवेदकवत्' शब्द में सप्तमीविभक्ति के अर्थ में 'वत्' प्रत्यय हुआ है । जिस प्रकार निवेदक को होनेवाली चिंता का समाधान कहा था, वैसे ही पुरुषोत्तम के विषय में होने वाली अर्थात् 'पुरुषोत्तम-श्रीकृष्ण ने मेरा अंगीकार किया या नहीं' इस प्रकार से होने वाली चिंता का समाधान कहा है, यह अर्थ है । और, इस प्रकार जैसे पूर्वश्लोक में कही गई रीति के अनुसार निवेदक द्वारा की गई अन्यविनियोग से होने वाली निवेदन-व्यर्थता की चिन्ता त्याग देनी चाहिए, उसी प्रकार "भगवान के अंगीकार न करने से मेरा निवेदन व्यर्थ हो जायेगा" ऐसी चिन्ता भी त्याग देनी चाहिए, यह अर्थ है ।

पुरुषोत्तमेन निरोधलीलायां स्वतोन्यभजनं क्रियमाणा भक्तास्तन्निवार्य स्वयमात्मसात्कृता इति तादृशे स्वयं सर्वात्मना निवेदने कृते सा शङ्का नोचितेति ज्ञापनाय **पुरुषोत्तम**पदम्। तत्रापि स्वरूपानन्ददानेनानिशं पोष्यमाणानां भक्तानां तदितरत्रोपयोगासम्भवेनैव न शङ्कोदय इति ज्ञापनाय **श्री**पदम् ।

पुरुषोत्तमेनेति । एतेन हीनमध्याधिकारिणां निवेदनविषयकचिन्ताभाव उक्तः । उत्तमाधिकारिणामाहुः **तत्रापी**ति । निवेदितात्मस्वपि मध्ये कृष्णसात्कृतप्राणानामुत्तमाधिकारिणां तु परमसौन्दर्यस्य स्वगतत्वाय तादृशाकारेण प्रादुर्भूते भक्तसहिते भगवति समर्पणस्य सिद्धत्वात् तदानन्देन पोष्यमाणानां शङ्काया उदयो यस्मात् स शङ्काहेतुर्नास्तीत्यर्थः । तदितरत्रेति । अम्बिकावनगमनेपि तं दोषं निवार्य स्वस्मिन्नुपयुक्ताः सर्वे कृताः, रासस्थानां तु गमनमेव नास्ति । इदमङ्गीकारस्वरूपं ज्ञेयम् । तथाप्युत्तमाधिकारिणां तु भगवदीयेभ्य इतरत्रोपयोग एव न सम्भवति । तस्मिन् सति हि तादृशशङ्का भवतीति भावः ।

प्रभुचरणों ने 'पुरुषोत्तमेन' से लेकर 'पुरुषोत्तमदपम्' तक की पंक्ति में हीन-मध्यम अधिकारियों को होने वाली निवेदनविषयिणी चिन्ता का सामाधान कहा है । एवं उत्तमाधिकारियों की चिन्ता का समाधान वे 'तत्रापि' शब्द से आरंभ कर रहे हैं । यहाँ भाव यह है कि समस्त निवेदित-आत्माओं के अंतर्गत भी जो कृष्ण से अपने प्राणों को आत्मसात करने वाले उत्तमाधिकारी हैं, उनका तो अंतःकरणों में अपने परमसौंदर्य को स्थापित करने के लिए अपने भक्तों के सहित प्रादुर्भूत हुए ऐसे भगवान को समर्पण हुआ है अतः भगवान के ऐसे आनंद

१ उक्तनिवेदकवदिति पाठः ।

से निरंतर पोषित हुए उत्तमाधिकारियों को जिस कारण से शंका उत्पन्न होती है, उस शंका का कारण ही नहीं है, यह अर्थ है ।

अब तदितरत्र इत्यादि शब्दों की व्याख्या कर रहे हैं । (यहाँ 'तदितरत्र' पद से लेकर 'श्रीपदम्' तक के शब्दों का श्रीमत्प्रभुचरण की व्याख्यानुसार अर्थ यह है कि जिन भक्तों को भगवान ने अपने स्वरूपानंदसे पोषित किया है, ऐसे भक्तों का भगवान से इतर कोई दूसरे स्थान पर उपयोग हो जाना संभव ही नहीं है। यहाँ टीकाकार इसी बात को श्रीमद्-भागवत में आए 'अंबिकावन के प्रसंग से और स्पष्ट कर रहे हैं । यहाँ उल्लेख है कि एक बार नंदबाबा एवं अन्य दूसरे गोपों ने शिवरात्रि के अवसर पर अंबिकावन की यात्रा की एवं भगवान शंकर एवं देवी अंबिका का बड़े ही धूमधाम से पूजन किया । रात्रि के समय वहाँ एक सुदर्शन नाम के अजगर ने नंदबाबा का पैर पकड़ लिया और जलती हुई लकड़ी से मारे जाने पर भी उन्हें नहीं छोड़ा । वहाँ भगवान ने उसे अपने चरणारविंदों से छूकर उन्हें मुक्त किया । इस प्रसंग पर श्रीमहाप्रभु सुबोधिनी में लिखते हैं कि इस समय तक भगवान पूतना-वध, कालियानाग-वध, दावानल एवं गोवर्धन-उद्धरण' इत्यादि लीलाओं से स्वयं का स्वरूप प्रकट कर चुके थे एवं गोपबालकों का चित्त अपने स्वरूप में स्थापित कर चुके थे । इतना होने पर भी नंदबाबा एवं गोपबालकों ने अन्याश्रय किया। अतः श्रीमहाप्रभु कहते हैं कि अन्याश्रय करने वाले को तो कालरूप सर्प पकड़ेगा ही अतः उन्हें ऐसा दंड मिला। देखें (श्री.भा. १०/३४/१....१९) । टीकाकार इसी प्रसंग का उदाहरण देकर यह कहना चाह रहे हैं कि जैसे भगवान ने इन अन्याश्रय करने वालों को भी अन्यत्र चित्त की वृत्ति को हटाकर स्वयं में स्थापित की, वैसे वे हम पर भी अवश्य कृपा करेंगे, यह अर्थ है ।) **जिस प्रकार व्रजभक्तों के अंबिकावन जाकर अन्याश्रय करने पर भी प्रभु ने उनके दोष दूर करके उन सभी की चित्तवृत्ति स्वयं में स्थापित की, उसी प्रकार यहाँ भी अवश्य करेंगे । व्रजभक्त तो अंबिकावन गये भी और अन्याश्रय किया भी परंतु गोपीजन तो अंबिकावन गयी ही नहीं एवं अन्याश्रय किया ही नहीं । यही भगवान के अंगीकार करने का स्वरूप है, यह जान लेना चाहिए । फिर भी इतना तो समझना ही चाहिए कि उत्तमाधिकारियों का तो भगवदीयों से अतिरिक्त और कहीं उपयोग होना संभव ही नहीं होता; अन्यत्र कहीं उपयोग होने से ही इस प्रकार की शंकाएँ होती है, यह भाव है ।**

तथा च तद्युक्ते तत्र निवेदने सा त्याज्येति भावः । कदाचिल्लोकभयाद्युपस्थितौ तन्निवारणाय जीवस्वभाववशादन्यविनियोगेपि तथेत्याहुः[1] विनियोगेपीति । प्रमादात्तथासम्भवेपि प्रभुर्न त्यक्ष्यति । यतस्तत्स्वभाववशात्तथाभूतमप्युद्धर्तुं तत्साधनानपेक्षः ॥ ५ ॥

तद्युक्ते इति । ताभिः श्रीपदसूचितलीलाभिश्च युक्ते निवेदने सति भ्रमात् प्राप्ता शङ्का त्याज्येत्यर्थः । तथा च पुरुषोत्तमे यन्निवेदनं तद्विषयिणी पुरुषोत्तमकृताङ्गीकाराभावहेतुकनिवेदनासम्पत्तिचिन्ता, तथा निवेदककृतान्यविनियोगहेतुकनिवेदनहानिचिन्तावत् त्याज्येति मूलार्थः । निवेदनविषयिणी चिन्ता निवेदके इव पुरुषोत्तमेपि त्याज्येत्यन्वयः । अन्यविनियोगेपीति । राज्याद्याश्रयणेपीत्यर्थः । ज्ञात्वा त्वास्यया तदपि न कर्तव्यमित्याशयेनापिशब्दार्थमाहुः प्रमादादिति ॥ ५ ॥

अब तद्युक्ते शब्द की व्याख्या कर रहे हैं । 'तद्युक्ते' (तद्+युक्ते) शब्द का अर्थ यह है कि 'श्री' पद से उपर सूचित की गई लीलाओं से युक्त जो पुरुषोत्तम हैं, उनमें निवेदन कर लेने के पश्चात् ऐसे भ्रमों से उत्पन्न होने वाली चिंताएँ त्याग देनी चाहिए । अतः इस प्रकार, पुरुषोत्तम में निवेदन कर लेने के पश्चात् 'उन्होंने मेरा अंगीकार किया या नहीं ?' ऐसी निवेदनविषयिणी चिंता उसी प्रकार त्याग देनी चाहिए, जिस प्रकार निवेदक द्वारा अन्य विनियोग से उत्पन्न होने वाली निवेदन-व्यर्थता की चिंता त्याग देनी चाहिए, यह मूल का अर्थ है । जिस प्रकार निवेदक को निवेदनविषयिणी चिन्ता त्याग देनी चाहिए, उसी प्रकार 'पुरुषोत्तम ने मेरा अंगीकार किया नहीं ?' यह चिन्ता भी त्याग देनी चाहिए, यह अन्वय हुआ । अब <u>अन्यविनियोगेपि</u> इत्यादि शब्दों की व्याख्या करते हैं । इसका अर्थ यह हुआ कि भगवान का आश्रय न करके जीवननिर्वाह करने के लिए किसी राजा-आदि प्रशासक का भी आश्रय कर लेने पर निवेदन-व्यर्थता की चिन्ता नहीं करनी चाहिए, यह अर्थ है । यहाँ ये समझना आवश्यक है कि जान-बूझ कर आस्थापूर्वक तो ऐसे किसी राजा का भी आश्रय नहीं करना चाहिए, इस आशय से श्रीमहाप्रभुजी ने 'अपि' शब्द का प्रयोग किया है और इसी के गूढ़ार्थ को श्रीमत्प्रभुचरणों ने प्रमादात् शब्द से कहा है । टीकाकार यहाँ मूल श्लोक में आए 'अपि' शब्द पर ध्यान दिला रहे हैं। 'अपि' शब्द का अर्थ होता है भी । इसका आशय यह है कि, किसी आपातकालीन स्थिति में या जीव निर्वाह के लिए ऐसे किसी अन्य का आश्रय करना पड़ जाय तब तो क्षम्य है परंतु जान-बूझ कर या ज्ञानपूर्वक तो ऐसे किसी अन्य का भी आश्रय नहीं करना चाहिए । इसी बात को प्रभुचरणों ने 'प्रमाद' शब्द से कहा है । वे कहते हैं कि प्रमाद से ऐसा हो जाय अर्थात् भूल से ऐसा हो जाय, तब तो ठीक है परंतु

---

१. न तथेति पाठः ।

जानबूझकर तो अन्य किसी का भी आश्रय नहीं करना चाहिए, यह अर्थ है ॥ ५ ॥

अङ्गीकारे लक्षणान्तरमप्याहुः लोक इति ।

लोके स्वास्थ्यं तथा वेदे हरिस्तु न करिष्यति ।
पुष्टिमार्गस्थितो यस्मात् साक्षिणो भवताखिलाः ॥ ६ ॥

कदाचित् प्रवाहवशाल्लौकिके वाणिज्यादौ, वैदिके आश्रमधर्मादौ वा स्थितौ तत्र विघ्न एव भवति, न तु तत्फलमित्यर्थः । तत्र हेतुः पुष्टीति ।

लक्षणान्तरमपीति । पूर्वश्लोके भगवतः पुरुषोत्तमत्वमेतद्विषयकाङ्गीकारे लक्षणं सन्देहाभावसाधकमुक्तम् । तत्र पुरुषोत्तमोपि नहि सर्वानङ्गीकृतवान्, किन्तु कांश्चन तादृक्प्रसादविषयान्, तत्राहं कीदृश इति स्फुटं ज्ञातुं न शक्यत इत्यधुना लोकवेदस्वास्थ्यदूरीकर्तृत्वरूपं लक्षणान्तरमप्युच्यते इत्यर्थः । **स्वास्थ्य**पदस्यार्थमाहुः **आस्थिता**विति । आस्थितिः कायवाङ्मनसां[1] तदीयत्वमिति लक्षणमेकादशस्कन्धसुबोधिन्यामुक्तम् । तथा च मूले स्वास्थ्यमित्यत्र स्वपदेन लोकवेदौ तन्निष्ठतां न करिष्यति, सिद्धां च दूरीकरिष्यति, विघ्नसम्पादनेनेति शेषः । तथा चैवं विघ्नेनाङ्गीकारो निश्चेय इति भावः । आस्थितौ विघ्नकथनेन इदं मम कार्यसाधकमिति ज्ञात्वा तद्विश्वासेन वाणिज्यादिकमाश्रमधर्मादिकं च न कर्तव्यम्, किन्तु एतद् द्वारा भगवान् करिष्यतीति ज्ञात्वा तदुभयं कर्तव्यमिति भावः ।

अब लक्षणान्तरमपि इत्यादि शब्दों की व्याख्या कर रहे हैं । इस वाक्य के द्वारा प्रभुचरण, पूर्वश्लोक में भगवान पुरुषोत्तम के अंगीकार करने के लक्षण में जो संदेह रह गया हो तो, उसका निवारण कह रहे हैं । और वह लक्षण यह है कि, पुरुषोत्तम भी सभी का अंगीकार नहीं करते अपितु जो कोई ऐसे तादृशी हों एवं जो उनके कृपापात्र हों उन्हीं का अंगीकार करते हैं । ऐसी परिस्थिति में जीव को 'परंतु इनमें मैं कैसा हूँ ?' यह जानना शक्य नहीं होता अतः अब वे उनके अंगीकार का दूसरा लक्षण भी 'भगवान अंगीकृत जीव को लोक एवं वेद में सफलता (स्वस्थता) नहीं देते " इस प्रकार से कह रहे हैं, यह अर्थ है । 'स्वास्थ्य' पद का अर्थ प्रभुचरण 'आस्थितौ' शब्द से कर रहे हैं । 'आस्थितिः शब्द का अर्थ होता है, काया-वाणी-मन से उसका हो जाना-यह लक्षण एकादशस्कंध की सुबोधिनी में कहा गया है । और इस ग्रंथ में 'स्वास्थ्य' पद में प्रयुक्त 'स्व' पद से यह अर्थ समझना चाहिए कि, भगवान जिसका अंगीकार करेंगे उस जीव की लोकवेद में निष्ठा नहीं करेंगे और यदि उसकी निष्ठा हो तो भी विघ्न पैदा करके दूर कर देंगे, यह अर्थ है । और इस प्रकार भगवान विघ्न संपादित करके अंगीकार निश्चित् करते हैं, यह भाव है । इन लौकिक - वैदिक कार्यों में जीव की निष्ठा होने पर भगवान उसमें विघ्न उपस्थित कर देते हैं - ऐसा कहने में आशय यह है कि जीव को 'ये लौकिक-वैदिक कर्म ही मेरे कार्यसाधक हैं' इस विश्वास से व्यापार-आदि एवं आश्रमधर्म आदि नहीं करने चाहिए परंतु इनके द्वारा भगवान ही करेंगे, ऐसे जानकर ये समस्त लौकिक एवं वैदिक कर्म करने चाहिए, यह भाव है ।

तद्विनापि स्वबलेनैव सर्वकर्ता यत इति भावः । पुष्टिमार्गाङ्गीकारे मर्यादां न सहत इति ज्ञेयम् । एवं सति किं कार्यमित्याकाङ्क्षायामाहुः, साक्षिवत् तत्कृतं पश्यत ॥ ६ ॥

सेवाकृतिर्गुरोराज्ञा बाधनं वा हरीच्छया ।
अतः सेवापरं चित्तं विधाय स्थीयतां सुखम् ॥ ७ ॥

सेवाकृतिरिति । गुर्वाज्ञाया अबाधनं यथा भवति, तथा सेवाकृतिः पूर्वमपेक्षिता । एवं वर्तमानानां कदाचिद् विशेषतो भगवदाज्ञा चेत्, गुर्वाज्ञा विरुद्धा भवेत्, तदा तथा कार्यमित्याशयेनाहुः **बाधनं वा हरीच्छया ।**

स्वयमेव समर्थत्वात् स्वकीयानां साधननिष्ठतां निवारयतीत्याहुः **तद्विनापी**ति । ननु तथापि सिद्धस्य साधनस्य विघाते को हेतुरित्याशङ्क्य तृतीयचरणस्य तात्पर्यान्तरमप्याहुः **पुष्टिमार्गाङ्गीकारे** इति । **किं कार्यमि**ति अनास्थया कृतो यत्नः कथं फलं जनयेदित्यर्थः । **साक्षिवदि**ति । यथा साक्षी कर्तुर्हानिवृद्ध्योर्हर्षशोकरहितः सन् कर्तृसम्पादितं फलं पश्यति, तथा हर्षशोकरहिताः

---

१. 'कायेन वाचा मनसेन्द्रियैर्वा' इति ।

सन्तः साधनानास्थया भगवत्सम्पादितं फलं विघ्नं वा पश्यतेत्यर्थः । तथा च भगवानेव तस्य यत्नस्य फलजनकतां सम्पादयिष्यतीति भावः ॥ ६ ॥

चूँकि प्रभु स्वयं ही सभी कुछ करने में समर्थ हैं अतः जीवों की भगवान में न होकर साधनों में रही हुई निष्ठा का प्रभुचरणों ने **तद्धिनापि** इत्यादि शब्दों से निराकरण किया है । किंतु यहाँ एक शंका यह होती है कि, यह बात तो ठीक है कि भगवान साधनों में रही हुई निष्ठा का विघात कर देते हैं परंतु जो साधन स्वतः ही सिद्ध हो चुका हो, तो ऐसे बने-बनाए साधन का विघात करने में क्या हेतु है ? तो इस शंका का समाधान मूल श्लोक के तीसरे चरण (पुष्टिमार्गस्थितो यस्मात्) के दूसरे तात्पर्य से प्रभुचरण **पुष्टिमार्गाङ्गीकारे** शब्दों से कर रहे हैं । इसका अर्थ यह हुआ कि यदि जीव पुष्टिमार्ग में अंगीकृत हुआ है तो उसके समस्त लौकिकवैदिक कार्य भी पुष्टिमार्गीय पद्धति से ही सिद्ध होंगे, लोक एवं वेद में कहे साधनों द्वारा नहीं। और पुष्टिमार्गीय पद्धति यह है कि जीव के समस्त कार्य प्रभु ही सिद्ध करते हैं, यह अर्थ है । **किं कार्यम्** इत्यादि शब्दों का अर्थ यह है कि, यदि इन लौकिक-वैदिक कार्यों में आस्था न रखने का उपदेश दिया गया है तो आस्था रखे बिना किया गया कोई भी कार्य कैसे फल उत्पन्न करेगा ? इस शंका का समाधान प्रभुचरण **साक्षिवत्** इत्यादि शब्दों से कर रहे हैं । वे कहते हैं कि, जिस प्रकार एक साक्षी कर्ता की हानि एवं वृद्धि में हर्ष-शोक रहित होकर केवल उसके द्वारा संपादित फल को मात्र देखता है, उसी प्रकार जीव को भी हर्ष-शोक से रहित होकर साधनों में निष्ठा न रखते हुए भगवान द्वारा संपादित फल को अथवा विघ्न को मात्र देखते रहना चाहिए, यह अर्थ है । और, इस प्रकार, उस जीव के प्रयत्नों का फल भगवान ही संपादित करेंगे, यह भाव है ॥ ६ ॥

विकल्पेनाबाधनमित्यर्थः । एवं सति गुर्वाज्ञाया अबाधने बाधने वा सेवैव मुख्या यतोऽतस्तथैव स्थेयमित्याहुः अत इति । एवं सति पर्यवसितं सुखमेवेत्याशयेन सुखमित्युक्तम् ॥ ७ ॥

विकल्पेनेति । साक्षात्सेवायां सिद्धायां साधनरूपसेवायामबाधनमिति व्यवस्थितविकल्पेनेत्यर्थः । तथैव स्थेयमिति । आवश्यककार्यार्थं कदाचित् कार्यस्य तत्परत्वेपि चित्तं सेवापरमेव विधातव्यम्, नतु तत्कार्यपरमिति यत्नानुचिन्तनं न कर्तव्यमिति ग्रन्थारम्भे उक्तोर्थ उपसंहृतः ॥ ७ ॥

अब **विकल्पेन** इत्यादि वाक्यों की व्याख्या कर रहे हैं । यहाँ विकल्प का अर्थ यह है कि, साक्षात् सेवा सिद्ध होने पर (अर्थात् जब प्रभु सानुभाव जताने लगे एवं स्वयं माँग कर सेवा का सुख देने लगें, और कोई विशेष आज्ञा हमें करें तब) उतने अंश में भगवद्-आज्ञा के अनुसार करना चाहिए और साधनरूप सेवा करते समय (अर्थात् गुरु-आज्ञा के अनुसार करते समय) गुरु-आज्ञा का बाधन न होता हो, वैसे करना चाहिए । अब **तथैव स्थेयम्** इत्यादि शब्दों की व्याख्या कर रहे हैं । इन शब्दों का अर्थ यह है कि किसी आवश्यक कार्य के लिए कदाचित् उस कार्य में तत्पर हों भी जाएँ तथापि चित्त तो सेवा में ही लगा कर रखना चाहिए, उस कार्य में नहीं । और, उस कार्य को करने के यत्न का बारंबार चिंतन भी नहीं करना चाहिए । इस प्रकार ग्रंथ के आरंभ में कहे हुए अर्थ का ही यहाँ प्रभुचरण उपसंहार कर रहे हैं ॥ ७ ॥

कदाचित् पुत्रादिवियोगशङ्काजनितदुःखेन चिन्तासम्भवे गतिमाहुः **चित्तोद्वेगमिति** ।

चित्तोद्वेगं विधायापि हरिर्यत्करिष्यति ।
तथैव तस्य लीलेति मत्वा चिन्तां द्रुतं त्यजेत् ॥ ८ ॥

नन्विदमखिलमशक्यमिव भाति । तथाहि । श्रवणमारभ्य सख्यपर्यन्तागतौ हि पश्चान्निवेदनवार्ता । तत्र प्रत्येकं तदेव दुरापमिति दूरतरा निवेदनदिगपि ।

कदाचिदिति । कदाचित् पुत्रादिर्वियुक्तो भवेदिति सम्भावनया जनितं यद्दुःखं चित्तस्य पुत्रादिपरता इति यावत्, तेन हेतुना निवेदनविषयिणी चिन्ता सम्भवति । तथा च लोकवन्ममापि चित्तं पुत्रादिपरं जायत एवातो निवेदनं सम्यक्नं नवेति चिन्तासम्भवे गतिं तद्भावप्रकारमाहुरित्यर्थः । चित्तस्योद्वेगं[1] भगवदीयत्वाननुसन्धानेन पुत्रादिपरतां विधायापि यद्यत् करिष्यति सा सा तथा तत्तत्प्रकारिकैव तस्य लीला निवेदिनां सर्वं कार्यं स्वयमेव करोतीति भावः इति मत्वा निवेदनविषयिणीं चिन्तां त्यजेदिति मूलार्थः । एतच्चिन्तास्थापने

---

१. बाधनमिति पाठः । २. उत्कृष्टं वेगमिति पाठः ।

'संशयात्मा विनश्यती'तिवाक्यात् सर्वमेव नश्यतीति द्रुतमित्युक्तम् । निवेदनं सम्पन्नमेव, परं विलम्बेन भगवतः स्वप्रापणं चिकीर्षितमिति ज्ञेयमित्यर्थः

कदाचित् इत्यादि शब्दों की व्याख्या करते हैं । इनका अर्थ यह है कि, कदाचित् 'पुत्रादि से वियोग हो जाय' ऐसी संभावना से जनित जो दुःख होता है अर्थात् चित्त का निरंतर पुत्र-आदि में रहना जैसी चिंताओं से निवेदनविषयिणी चिन्ता संभव होती है और, "लोक में अन्य लोगों की तरह मेरा भी चित्त मेरे पुत्र-आदि परिवारजनों में जाता ही है अतः मेरा निवेदन पूर्णरूपेण संपन्न हुआ या नहीं" ऐसी चिन्ता होने पर किस प्रकार का भाव रखना चाहिए, यह कह रहे हैं, यह अर्थ है । इस प्रकार से चित्त में उद्वेग होने पर मन में भगवदीयता का अनुसंधान रखते हुए मन में यह भाव रखें कि, भले ही प्रभु मेरा ध्यान मेरे पुत्र-परिवार में लगा रहे हैं तथापि वे जो-जो करेंगे वह-वह उनकी वैसे-वैसे प्रकार की लीला ही है एवं वे निवेदितों के समस्त कार्य स्वयं ही संपन्न करते हैं, यह मानकर निवेदनविषयिणी चिन्ता त्याग देनी चाहिए, यह मूलार्थ है । ऐसी चिन्ता करने से "संशयात्मा नष्ट हो जाता है (भ.गी. ४/४०)" इस वाक्यानुसार सभी कुछ नष्ट हो जाता है अतः 'सभी चिंताएँ शीघ्र त्याग देनी चाहिए (द्रुतम्)' यह कहा गया है । साथ ही साथ यह भी समझना चाहिए कि, निवेदन तो भलीभाँति संपन्न हुआ ही है परंतु भगवान ने हमें उनकी प्राप्ति विलंब से कराने की इच्छा रखी है, यह अर्थ है।

अतस्तत्कृतचिन्तान्यवियोगचिन्तादिसमाहितिर्निरर्थेति विचार्य साधनफले एकीकृत्य सर्वसमाधानमाहुः **तस्मादिति** ।

तस्मात् सर्वात्मना नित्यं श्रीकृष्णः शरणं मम ।
वदद्भिरेवं सततं स्थेयमित्येव मे मतिः ॥ ९ ॥

यस्मादुक्तरीत्या स्वतः सर्वमशक्यमतः सर्वात्मना शरणागतौ प्रभुरेव सम्पादयिष्यतीति हृदयम् । भक्तिमार्गीयान् सर्वानंशान् विचार्य तत्र प्रतिबन्धं स्वाशक्तिं च स चेत् पश्यति, तदा सर्वात्मना तथा भवति । नित्यमिति नैरन्तर्यमुच्यते । अन्यथा कालेनासुरधर्मप्रवेशः स्यात् ।

अन्तःकरणे तथाभावेऽतथाभावे वा तथा वदनमावश्यकमिति ज्ञापयितुं **सततमेवं वदद्भिरित्युक्तम्** । एवं सति लोकशिक्षाप्यानुषङ्गिकी सिध्यति । एवमुक्तप्रकारेण सेवापरतया स्थेयमित्यर्थो वा ।

तत्कृतेति । निवेदनकृता यत्नकरणाकरणविषयिणी चिन्तेत्यर्थः । **साधनफले** इति । **साधनं** श्रवणाद्यष्टकम्, फलमात्मनिवेदनम्, शरणागतावेकदैवैते सम्पद्येते इत्यर्थः ॥ ८ ॥ सर्वमशक्यमिति । श्रवणादिनवकमप्यशक्यमित्यर्थः । **प्रभुरेवेति**, समर्थत्वाच्छरणं गतानामेकदैव सर्वं सम्पादयिष्यतीत्यर्थः । **प्रतिबन्धमिति** । साधारणप्रतिबन्धोद्वेगं लौकिकभोगकृतं प्रतिबन्धमित्यर्थः । 'भगवत्कृतप्रतिवन्धे त्वासुरोयं जीव इति निर्धार' इत्युक्तम् । **अन्तःकरणे** इति । एतेनैकांशेनापि भगवत्सम्बन्धे आसुरप्रवेशो न भवतीति सूचितम् ।

अब तत्कृत इत्यादि शब्दों की व्याख्या कर रहे हैं । ('तत्कृत' इत्यादि शब्दों का अर्थ यह है कि, जैसे प्रभुचरणों ने किसी पूर्वपक्षी की शंका उठाते हुए आज्ञा की थी कि, उपर्युक्त निवेदन करने के पश्चात् चिंता दूर हो जाने का उपदेश अशक्य लगता है, क्योंकि नवधाभक्ति में श्रवणभक्ति से गिनकर अंतिम भक्ति निवेदन है और जहाँ श्रवण ही अशक्य लग रहा हो, वहाँ निवेदन की तो दिशा भी दूरतर है अतः उस निवेदन को उत्पन्न हुई चिंताओं (तत्कृत) का समाधान करना व्यर्थ ही है। इसी शंका को प्रभुचरणों ने "तत्कृत" इत्यादि शब्दों से कहा है। इसका समाधान आपश्री ने "साधनफले एकीकृत्य" इत्यादि शब्दों से आगे दिया है) **तत्कृत** इत्यादि शब्दों का अर्थ यह है कि निवेदनकर्ता को इन चिंताओं का समाधान करने का यत्न करना व्यर्थ ही है। **साधनफले** इत्यादि शब्दों की व्याख्या कर रहे हैं । श्रवण से लेकर सख्य भक्ति तक की आठ प्रकार की भक्ति 'साधन हैं ।' नौवीं भक्ति आत्मनिवेदन फल है । शरणागति होने पर ये दोनों एक बार में ही संपादित हो जाते हैं, यह अर्थ है ॥ ८ ॥

नन्विदमपि न स्वशक्यमित्याशङ्क्य 'यमेवैष वृणुत' इति श्रुतेर्मे **मतिरित्येव**, एवंप्रकारिकैवेत्यर्थः ।

प्रथमपक्षे एवमित्यनेन पूर्वार्धानुवादः । द्वितीयपक्षे पूर्वोक्तस्य सेवापरं चित्तं विधाय स्थीयतामित्यस्यानुवादः । **नन्विति** ।

---

१. भगवद्भक्तद्वारा भगवच्छरणगमनं तदनुसन्धानं च साधनम् । फलं भगवदङ्गीकारः । ततो भगवद्भक्तद्वारा भगवच्छरणगतौ भगवता निवेदनस्याङ्गीकाराद्भक्तिषु क्रमनियमाभावान्निवेदनसिद्धेस्तत्र चिन्तासाधनानामयुक्तत्वादिति भावः ।

अर्धाङ्गीकारेण समाधानमाहुः **यमेवेति** । भगवतो वरणलभ्यत्वात् मम मत्सम्बन्धेन मदीयानां च वृतत्वान्मन्मतिसिद्धप्रकारं मदीयानां भगवानेव शक्यं करिष्यति, अन्येषां वरणरहितानां त्वशक्यमेवेति भावः ॥ ९ ॥

अब **सर्वमशक्यम्** इत्यादि शब्दों की व्याख्या कर रहे हैं । 'सर्वमशक्यम्' शब्द का अर्थ है - श्रवण आदि नौ प्रकार की भक्ति भी अशक्य है । **प्रभुरेव** इत्यादि शब्दों का अर्थ यह है कि चूँकि प्रभु समर्थ हैं अतः उनकी शरण में जाने वाले भक्तों के लिए एक बार में ही वे सभी कुछ संपादित करेंगे । अब **प्रतिबंध** शब्द की व्याख्या करते हैं । प्रतिबंध का अर्थ है - साधारण प्रतिबंध। जैसे 'उद्वेग एवं लौकिक भोगो से होने वाला प्रतिबंध । जहाँ भगवान द्वारा प्रतिबंध होता है, वहाँ आचार्यचरणों ने सेवाफल-विवरण में "भगवत्कृत प्रतिबंध होने पर तो, जीव का आसुरी होना निश्चित् होता है" यह निर्धारित किया है । अब **अन्तःकरणे** इत्यादि शब्दों की व्याख्या कर रहे हैं । इस पंक्ति से यह सिद्ध होता है कि सर्वथा शरणागति हो या न हो परंतु एकांश में भी यदि भगवत्संबंध स्थापित हो जाय तो आसुरावेश नहीं होता है, यह सूचित किया है ।

यहाँ प्रभुचरणों ने प्रथमपक्ष में अपने "यस्मादुक्तरीत्या स्वतः" से लेकर "लोकशिक्षाप्यानुषङ्गिकी सिध्यति" तक की पंक्तियों में इस श्लोक के प्रथमचरण अर्थात् "तस्मात्.....मम" इस पंक्ति का अर्थ किया है । इसके पश्चात् आपश्री पिछले श्लोकों में आए "सेवापरं चित्तं विधाय स्थीयतां सुखम्" इस पंक्ति का अर्थ कर रहे हैं । अब हम **ननु** इत्यादि पंक्तियों पर विचार कर रहे हैं । प्रभुचरण आज्ञा कर रहे हैं कि जीव को यदि मात्र अष्टाक्षर लेकर सेवापर रहना भी संभव न हो पा रहा हो, तो प्रभुचरण **यम्** इत्यादि शब्दों से यह समझा रहे हैं कि आचार्यचरणों के द्वारा प्रभु को निवेदन किया गया होने के कारण जीव का आधा अंगीकार तो हो चुका है । तात्पर्य यह है कि भगवान जिसका वरण करते हैं, उसी को प्राप्त होते हैं और आचार्यचरणों द्वारा संबंधित होने के कारण प्रभु ने उन निजजनों का वरण किया है अतः आपश्री **मे मतिः** इत्यादि शब्दों से यह आज्ञा कर रहे हैं कि मेरे मतानुसार, मेरी कही शरणागति समस्त वस्तुएँ, मेरे निजजनों के लिए भगवान ही शक्य बनाएंगे । अन्यथा जिनका आचार्यचरणों ने ही वरण नहीं किया है, उनके लिए तो यह सभी कुछ अशक्य ही है, यह भाव है ॥ ९ ॥

भक्तिमार्गे प्रवृत्तस्य दार्ढ्यार्थमिदमुच्यते ।
अन्धस्य सूर्य इव तद्विमुखस्यात्र नार्पिता ॥ १ ॥
भक्तिमार्गसुधासिन्धोर्विचारमथनैः स्वयम् ।
स्फुटीकृतानि रत्नानि श्रीमदाचार्यपण्डितैः ॥ २ ॥
मयोज्ज्वलीकृतानीत्थं हृदि धृत्वा व्रजाधिपम् ।
भजन्तु भक्ता येनासौ न विमुञ्चति कर्हिचित् ॥ ३ ॥
इति श्रीश्रीविट्ठलदीक्षितविरचितो नवरत्नप्रकाशः समाप्तः ।

तर्हि बोधनं किमर्थमित्याशङ्क्य स्वयमाहुः **भक्तिमार्गे** इति । एतेन वृतस्य दार्ढ्यं भवतीत्यर्थः । अवृतस्य तु न भविष्यतीत्याहुः **अन्धस्येति** ॥ १ ॥

भक्तिमार्गसुधासिन्धोरिति । भक्तिमार्गप्रवर्तकः **सुधासिन्धुर्भागवतशास्त्रं** तस्मादपादानात् **विचाररूपैर्मन्थनदण्डैः करणैः** । **श्रीमदाचार्यपण्डितैः** कर्तृभिः । **स्वयं** समुद्धृतानि, न तु गुर्वादिशिक्षया तादृशानि ॥ २ ॥

मया चेत्यमुज्ज्वलीकृतानि रत्नानि स्वहृदि धृत्वैतदुक्तप्रकारेण व्रजाधिपं भक्ता भजन्तु, येनाचार्योद्धृतरत्नप्रकारकभजनेनासौ न विमुञ्चतीत्यर्थः ॥ ३ ॥

इति श्रीविट्ठलरायात्मजश्रीबल्लभविरचिता नवरत्नटिप्पणी समाप्ता ।

यदि भगवद्-वरण के द्वारा ही भगवान प्राप्त होते हों तो आचार्यचरणों को इस ग्रंथ में किए गये उपदेशों का बोध कराने की क्या आवश्यकता है ? यदि कोई ऐसी शंका करे तो उसे प्रभुचरण **भक्तिमार्गे** इत्यादि शब्दों से कह रहे हैं । इन उपदेशों से भगवान के द्वारा वरण किए जा चुके भक्त की शरणागति दृढ़ सिद्ध होती है, इस कारण से आचार्यचरण इतना उपदेश कर रहे हैं,
यह अर्थ है । जिनका वरण ही नहीं हुआ है, उनके लिए तो ये उपदेश वैसे ही निरर्थक हैं, जैसे किसी अंधे के लिए सूर्य - यह बात प्रभुचरणों ने **अन्धस्य** इत्यादि शब्दों से कही है । ॥ १ ॥

श्रीविट्ठलेशात्मजश्रीवल्लभकृतप्रकाशटिप्पणम्

अब **भक्तिमार्गसुधासिन्धोः** इत्यादि शब्दों की व्याख्या कर रहे हैं । अर्थात् भक्तिमार्ग के प्रवर्तक पंडित श्रीमदाचार्यचरणों ने सुधासागर-श्रीमद्भागवत से विचाररूप मंथन के द्वारा स्वयं इन रत्नों को भलीभाँति उद्धृत किया है, किसी गुरु-आदि की शिक्षा द्वारा नहीं । ॥ २ ॥

प्रभुचरण कह रहे हैं कि, मैंने व्रजाधिप-श्रीकृष्ण को हृदय में धारण करके ही इन रत्नों को उज्जवल किया है; आचार्यचरणों द्वारा उद्धृत किए गये इन रत्नों में कहे प्रकार से भजन करने वाले भक्त को प्रभु कभी भी त्यागते नहीं हैं, यह अर्थ है । ॥ ३ ॥

यह श्रीविट्ठलरायात्मज 'श्रीवल्लभ' विरचित नवरत्नटिप्पणी समाप्त हुई।

श्रीकृष्णाय नमः ।

नवरत्नम् ।

श्रीमुरलीधरकृतविवृतिप्रकाशसमेतम् ।

नवरत्नसुवर्णनिर्मिता परमानन्दरसस्य बोधिका ।
हृदये वसतात् सदोर्वशी परमोच्चग्रहरश्मिरूपिणी ॥ १ ॥
रसमयसुवर्णधारावर्षणशीला दशविधप्रगुणाः ।
श्रीमुरलीधरलीला मुरलीधरमानसे सन्तु ॥ २ ॥
वसु सुवर्णमयं परितः परं रसमयं च विधाय सुमण्डलम् ।
विविधनर्तनदर्शनतत्परा रसनिधिर्मयि सैव विराजताम् ॥ ३ ॥
ललिते वृन्दाविपिने वैकुण्ठादप्यतीव रमणीये ।
क्रीडसि नवरसरुचिरे श्रीस्वामिन् मम हृदम्बुजे क्रीड ॥ ४ ॥
श्रीशुकदेवरहस्यं प्रकाशितं यैरतीव रमणीयम् ।
श्रीवल्लभाभिधानैर्नवधा तेभ्यो नमोस्तु मे सततम् ॥ ५ ॥
श्रीमद्विट्ठलप्रभुषु श्रीनवरत्नप्रकाशनिपुणेषु ।
सप्तविभक्तिरहस्यप्रकाशकेष्वस्तु मे प्रणतिः ॥ ६ ॥

अन्तःस्खलधर्मप्रधानकलिदूषितसमयतीर्थकर्तृमन्त्रद्रव्यश्रद्धादीनामसाधकत्वाद्वर्द्धिष्णुदुरवगाहपाषण्डादिनिपुणजनतासङ्गसञ्जाताज्ञानान्धकारसंभृतहृदयदरीनिविष्टविषयविषरससंभृतानन्तसंसारसागरे निमग्नतया चेतसः स्थिरत्वाभावाद्विध्युक्तरीत्या श्रवणादिसाधनाभावान्नवभीरत्नैश्चिन्ताभावपूर्वकं तदीयत्वानुसन्धानपूर्वकं च निरन्तरमष्टाक्षरवदनकृतिसाधनरूपसाध्यफलामतिसुगमां च श्रीकृष्णस्य श्रीमद्वदनरूपाः श्रीवल्लभाचार्या दैविजीवानुद्दिधीर्षन्तः प्रथमं मध्यनायकत्वेनालौकिकश्रेष्ठभानोर्विशेषरूपया निगूढद्विमात्रया आर्ययोपदिशन्ति **चिन्ता कापि न कार्येत्यादिना** ।

चिन्ता कापि न कार्या निवेदितात्मभिः कदापि ।
भगवानपि पुष्टिस्थो न करिष्यति लौकिकीं च गतिम् ॥ १ ॥

वसन्तादिपूर्णरसमयषडैश्वर्यादिमूर्तिमद्भिः सेवितस्य गोरसदानादानप्रवीणस्य द्वादशसुवर्णरत्नराशिकल्पतरुस्कन्धारूढस्य श्रुतिगीतद्वादशमाससंवत्सरादिरसमयसमयप्रादुर्भावकस्य गायकपरित्राणनिपुणैकव्यक्तिपदमात्राविद्योतितसकलसुषमास्पदकीर्तिप्राकट्यकारकस्य सप्ताक्षरव्यञ्जितोत्तमवासरस्य त्रिभुवनललितमाधुर्यादिसुगन्धलतामधुपानप्रवीणषट्पदस्य स्वीयजनानामाधिदैविकसकलज्योतिषामानुकूल्येन चिन्तानिवर्तकस्य द्वितीयचरणमात्राविद्योतितत्रयोदशमाससंवत्सरस्य लौकिकसकलशुभकर्मानर्हस्याप्यस्य भगवद्भक्तावाधिक्यद्योतकस्य तथाधिकमात्रायास्त्रयोदशीत्वेनानङ्गस्यापि साङ्गतासिद्धिबोधकस्य उत्तरदलाद्वैलक्षण्यद्योतनायाधिकैकमात्रस्य वा । सा मात्रा तु गायकपरित्राणसमर्थायाः, प्रथमचरणे गूढा न्यासे द्वितीयचरणे च प्रकटीकृता । अत्र च याकारे आकृतिरूपं निगूढवासुदेवपदमुत्तरान्वयि गूढमासमन्तात् सर्वप्रकारेण निवेदित आत्मा यैरित्यर्थात् । अत एव षट्पदत्वमुक्तम् । तस्य चरणान्तत्वेन गुप्तवामनत्वे सत्येकादशेति प्रथमचरणेन साम्यम् । अनेन मलिम्लुचातिरिक्तैकादशमासानां सङ्गहोपि द्योतितः । द्वितीयचरणं तु त्रयोदशमात्रं सममेव, त्रिपदायास्तृतीयान्त्यस्य व्यञ्जनस्य न्यासेऽगणनायाकारस्य वैकल्पिकवामनत्वे द्वादशमात्राः । अकारोप्यत्राकारात्पूर्वं प्रश्लिष्टो वेद्यः सकलवाग्रूपः । अस्या गायत्र्याश्च तुरीयस्य तुरीयनिगमवेदैकत्वाभावात् त्रिचरणैः साम्यम् । अस्यास्त्रिचरणायाश्चालौकिकश्रेष्ठभानुप्रकाशत्वम् । एकस्मिन्नक्षरे मध्यस्था दिव्यव्यक्तिरव्यक्ता पूर्वोत्तरान्वयिनी । पूर्वान्वयित्वे यशोदोत्सङ्गलालिता व्यक्तिरुत्तरान्वयित्वे कीर्त्यङ्कलालिता व्यक्तिर्व्यञ्जिता वेद्या । अङ्गो ह्यानन्दात्मा विद्यारूपो भगवत्प्राकट्यस्थानम् । व्यक्तिद्वयेप्यङ्गस्य समत्वात् । सकलवाग्रूपाक्षर एकस्मिन्नेकाङ्गः । द्वितीयायां व्यक्तौ

द्वितीयत्वेपि तज्जातित्वेनाद्वयत्वादेकाङ्कः । एवं चैकाङ्कस्य द्वित्वे होकादशी कृष्णवल्लभा प्रकटा भवति । तथा च दलद्वयस्याद्यन्तरहितत्वेन वर्तमानता उत्तरोत्तरं वर्तमानस्यैव रसावहत्वात् । योगबलेन भूतभविष्यत्पदार्थयोर्वर्तमानत्वेपि सर्वेषां तथात्वाभावात् । अत एव यथोत्तरं मुनीनां प्रामाण्यमिवैचोश्चोत्तरभूयस्त्वमिवान्तिमवर्णेऽर्थपर्यवसानमनुभवसिद्धं रसावहम् । अतो वाक्यपदीये 'पदेन वर्णा विद्यन्त' इत्यादि । किञ्च, दीर्घे मात्राद्वयम्, प्लवने त्रयमिति हरिः पञ्चधा इह द्वितीयचरणे मात्रात्रयं गुप्तम्, तद् द्वितीयव्यक्त्या व्यक्तीकृतं कदापीतिपदेनेति । न हि कदापीतिपदमेकम्, किन्तु पदत्रयम् । एवञ्च कदाप्येतस्मात् पदद्वयात् यदितिपदमाचार्यैः शेषत्वेन पूर्वोक्तसकलप्रकारबोधकं हृद्येव स्थापितम् । गायत्रीमात्रार्थसाम्याय तत्स्वात्मद्वितीयव्यक्त्या व्यक्तीकृतं वेद्यमिति भावः । द्वितीयचरणान्त इति पदे सति पञ्चदशमात्राभिस्तिथय इति कृष्णजन्मपक्षः । पदैर्भूतभविष्यद्वर्तमानाः एतत्सकलरहस्यार्थबोधकस्य 'क्षयः कार्तिकादित्रये नान्यतः स्यात् तदा वर्षमध्येऽधिमासद्वयं चे'ति संवत्सरस्यास्य मासास्त्रयोदशेति सोपि संगृहीतः । इति पदप्राकट्ये गूढाः षोडशकला द्वादशकले प्रविशन्ति । तृतीये मात्राभिः सूर्यस्य कलानामक्षरैर्मासानां पदैः प्रातरादीनां त्रयाणां द्योतकस्य तुर्ये मात्राभिः शुक्लपक्षद्योतकस्य रुद्रसङ्ख्याक्षरैर्मलिम्लुचातिरिक्तमासानां च पदैर्हरेः पञ्चात्मकत्वं स्पष्टयतः, प्रातःसङ्गममध्याह्नापराह्णसायाह्नानां च द्योतकस्य, दिनमणेरुत्तरपदमात्रस्य भावत्प्रयोगात् (?) स्वार्थिके कनि सत्याद्युदात्तस्य माणिकस्य रसेन परिपूर्णस्य सम्बन्ध्यानन्दात्मकरत्नस्य प्रतिपादकतया आर्याविशेषरूपाया मध्यनायकरत्नबोधिकाया अपि तद्रूपता वेद्या । वेद्यवेदकयोः संपृक्तकत्वात् । एवमग्रिमेष्वपि वेद्यम् । श्रीकृष्णस्य हरेः पञ्चविधत्वं श्रीप्रभुचरणैर्निबन्धे उक्तम् 'अग्निहोत्रं तथा दर्शः पूर्णमासः पशुस्तथा । चातुर्मास्यानि सोमश्च क्रमात् पञ्चविधो हरिः । तत्साधनं च स हरिः प्रयाजादि स्रुगादि यत् । प्राकृतं रूपमेतद्धि नित्यं काम्यं तु वैकृतमिति' वेदार्थस्य पञ्चधात्मकतां सूचयितुं हरिनामाक्षराणि चत्वारि भक्तजनदुःखहरणदक्षाणि समूहरूपेण पृथग्वर्णाभावरूपं च पञ्चममिति पञ्चधा हरिः । तथा कृष्णनाम्नि वर्णाः पञ्च । पञ्चवर्णोऽगिति । स चर्ग्वेदादिरिति पञ्च, अस्यासनत्वं पशूनामगम्यत्वाय सूचितम् । भगवतः भक्तानां तु विद्यात्मकमुखारविन्दपङ्क्तिं प्राप्य कृतार्थता भवति । रमन्ते भक्तानां मनांसि यत्र तद्रत्नम् । प्रत्येकं रत्नेषु नवत्वेपि क्रमो विवक्षितः । श्रेष्ठभानोः समयपरिच्छेदकज्योतिषां प्राधान्यात् तद्रत्नस्य मध्यनायकत्वम् । आर्याविशेषरूपछन्दसा द्योत्यद्योतकयोः श्रेष्ठत्वसूचनात् ।

अर्थस्येयमतिश्रेष्ठा श्रेष्ठभानो रसात्मिका ।
विशेषरत्नतापन्ना वसुरत्नप्रकाशिका ॥ १ ॥
मध्यस्था प्रथमं प्रोक्ता श्रीमद्वल्लभदीक्षितैः ।
सोर्वशी राजतां नित्या मुरलीधरमानसे ॥ २ ॥
अष्टरत्नप्रधाननवमस्योर्वशीत्वं प्रधानतयोक्तं माणिक्यस्य ।
रसमध्यसुवर्णनायिका वरमाणिक्यतया निरूपिता ।
हृदये मुरलीधरस्य सा लसतान्नित्यमनन्तवैभवा ॥ ३ ॥
त्रिचरणसमगायत्री तुरीयचरणेन संयुता तत्त्वम् ।
वेदानां प्रसवित्री मुरलीधरमानसे प्रकाशयताम् ॥ ४ ॥ १ ॥

दिनमणेर्दिनप्रधानस्य रत्नमभिधाय क्षणदाप्रधानस्य कृष्णसाराङ्कस्य स्वात्यमृतबिन्दूद्भवं मुक्ताफलाभिधं द्वितीयं रत्नमाहुः **निवेदनं च स्मर्तव्यमित्यादिना** ।

निवेदनं च स्मर्तव्यं सर्वथा तादृशैर्जनैः ।
सर्वेश्वरश्च सर्वात्मा निजेच्छातः करिष्यति ॥ २ ॥

स्मरणं चन्द्रेच्छे च मानसे । एवं च 'अहं तवास्मि' इति निरन्तरं स्मर्तव्यम् । तच्च भगवत्प्राप्तौ मुख्यं निमित्तम् । तेनाविकृतषोडशदल आधिदैविको भगवन्मनश्चन्द्र आधिभौतिकेऽविकृते सत् विद्यात्मतां याते अक्षरात्मनि व्यापके पञ्चदशकलत्वं प्राप्ते सेवकमनश्चन्द्रे निविशते, तदा षोडशकलो भवति । अत एव षोडशसङ्ख्याकाश्चरणाङ्काः । अत एव रसिकशिरोमणिभिः श्रीहरिरायैः 'यद्ध्यानाच्चेतोपि च षोडशकलमञ्जसा भवति' इत्युक्तम् । इहापिशब्दाच्चित्तबुद्ध्यहङ्काराणां तत्सङ्ख्याकानां चतुःषष्ट्यक्षरात्मिकाः कलाः सम्पद्यन्ते । सर्वथा तादृशैः कायवाङ्मनोभिरनन्यतया ये भवन्तं प्रपन्नाः **तादृशैरिति** सहार्थे तृतीया । यद्यपि स्मरणे सङ्गापेक्षा नास्ति, तथापि तादृग्भिन्नैः सह सङ्गनिवृत्त्यर्थं तथोक्तिः । सर्वसेवकानामीश्वरत्वेन निरोधकत्वात् तेष्वेव दैवेषु आत्मत्वमात्मीयत्वं च मनुते । अतो 'निजस्य नैजानां चाविकृतेच्छात' इत्युक्तं प्रकाशे । भगवदिच्छा परिक्षाद्यर्था तात्त्विकी नेत्यविकृतोक्ता । स्वतन्त्रप्रवाहमर्यादयो रत्ने शोकोत्पादकत्वात् शोकाश्रयत्वात् वा शुक्तित्वम् । क्षीणे पुण्ये मर्त्यलोकनिवेशस्योक्तत्वात् शोकजनकत्वम् । **करिष्यतीति**

---

१. जयतादिति पाठः । २. निवसत इति पाठः । ३. अन्त इति पाठः ।

सामान्योक्त्या केषुचिदविलम्बः, केषुचिन्मध्यविलम्बः, केषुचिदतिविलम्ब इति द्योत्यते । वर्तमानसामीप्ये भविष्यत्प्रयोगात् प्रथमः पक्षः, इतरौ तु सामान्यप्रयोगाद्वेद्यौ ।

उपरितनमर्यादा शुक्तिरधस्तात् प्रवाहरूपा च ।
उभयोः सम्पुटगर्भे स्वातिरसालं विरत्नरत्नेव ॥ १ ॥
उपरि महामर्यादाधस्तनशुक्त्या तु सम्पुटं याता ।
पुष्टिर्मुक्ता मध्येऽसंसृष्टा निर्गता ततः शुद्धा ॥ २ ॥
पुनरनयोर्न प्रविशति भगवद्भूषासु संसक्ता ।
इत्थं मुक्तारत्नं द्वितीयमथ द्वयं वेद्यम् ॥ ३ ॥
प्रवाहवेदमर्यादाशुक्तिसम्पुटनिर्गताः ।
कलानिधे रत्नरूपा मुक्ताः स्वातिरसात्मिकाः ॥ ४ ॥
भवन्तु भावे सरसे तासां मम रसात्मनः ।
सदा येन भवेद्भावो भूषणे भूषणे विभोः ॥ ५ ॥
प्रशस्तपुष्पवद्रत्ने सर्वरूपरसान्विते ।
श्रीकृष्णहृदये भाते भासेतां हृदये मम ॥ ६ ॥ २ ॥

रसवर्षणभावद्वादशात्मककृष्णसाराङ्काह्लादकरसरश्म्युदयमात्रेण प्रफुल्लतां प्राप्तवतोः, अत एव प्रशस्तयोरित्युत्कृष्टरमार्णवस्थरत्नरूपयोः कमलयोः पुष्पयोः सदा विद्यमानसाययोर्गोविप्रप्रतिपालकवंशप्रवर्तकयोरलौकिकयोः सकलभुवनाप्यायकत्वेन पुष्टिप्रदयोः सूर्याचन्द्रमसोः सदानन्दरूपे रत्ने अभिधाय तृतीयां सेवकव्यक्तिं विना सेव्यलीलानुदयात् पूर्वोत्तरान्वयिनीं सदानन्दमध्यस्थां चिदानन्दाक्षर-दैवजीवसम्बन्धिदेहरूपविद्रुमाख्यां मध्यपुरुषबोध्यामदिगन्तां रत्नव्यक्तिमाहुः सर्वेषामिति ।

सर्वेषां प्रभुसम्बन्धो न प्रत्येकमिति स्थितिः ।
अतोऽन्यविनियोगेऽपि चिन्ता का स्वस्य सोऽपि चेत् ॥ ३ ॥

वसुन्धराप्रधानानां प्राकृतानां स्वस्वीयदेहानां परब्रह्मसम्बन्धादलौकिकतां यातानामक्षरस्वरूपत्वेन चिद्रूपसात्त्विकानां विशेषेण मङ्गलद्रुमरूपता भवति । सा तु श्रीकृष्णाभरणत्वेन । किञ्च, द्रवतेर्गत्यर्थकत्वेनान्यत्र विनियोगसम्भव उक्तः । न हि स वस्तुतो भवति । यतोऽलौकिकहस्तिपकेन प्रभुचरणारविन्देन स्वसेवकमनोमत्तमातङ्गस्य स्वस्मिन्नेव स्थापनाय नित्याङ्कुशधारणं कृतम् । अत उक्तं ललिते 'एतत्पदपङ्कजमधुमत्तस्यायं निसर्ग एवाभूत् । नेतरभावं भजते यदङ्कुशो नित्यमेवास्ती'ति । प्रभोरिच्छायाः सर्वकार्यकरणसमर्थाया यः सम्बन्धः स परब्रह्मणः समत्वात् सर्वत्र समः । ईदृग्देहानां मङ्गलमन्दिरवेदत्रयात्मकाक्षराधारत्वेन मङ्गलरत्नत्वम् । स्वयं विराजमानत्वात् ।

भौमानां विद्रुमत्वं भवति निजपरस्वीयदेहादिकानाम्
कृष्णेऽद्धा स्वर्पितानां रसमयपरमालौकिकानां स्वभक्तेः ।
स्वीयाचार्यस्य मार्गे परमगुणगणालङ्कृता भूषणार्हाः
सेवायुक्ता यतस्ते रसमयवपुषो जङ्गमाः कल्पवल्लयः ॥ १ ॥
मच्चित्ते ता भवन्तु प्रणयरसभरा उर्वशी रत्नमध्यात्
बाह्यायां वीथिकायां हृदयपरिसरे रत्नरूपाः सुवर्णे ।
इत्थं रत्नं तृतीयं नवसु निगदितं पूर्णकामायमानम्
तस्मै दिव्याय मे स्यान्नम इह परमानन्दलाभाय नित्यम् ॥ २ ॥ ३ ॥

ननु मध्यहीनाधिकारिभिः स्वयं ज्ञात्वा स्वदेहस्यार्पितत्वेपि पुत्रादीनां ज्ञानाभावात् तद्देहानामज्ञानावृतचित्तत्वेन लौकिकत्वादन्यविनियोग एव भवतीति भवतिचिन्तेति बुधस्य सेवकजनशिक्षकस्य महापुरुषस्य निवेदकस्य प्रभावादज्ञानकृतनिवेदितदेहानामपि चिन्ता न कार्येति मरकताभिधं तुरीयं रत्नमाहुः अज्ञानादिति ।

अज्ञानादथवा ज्ञानात् कृतमात्मनिवेदनम् ।
यैः कृष्णसात्कृतप्राणैस्तेषां का परिदेवना ॥ ४ ॥

---

१. सदा विद्यमानसार्णवस्थरत्नरूपयोरिति पाठः ।

अज्ञानस्य व्युच्चरणोत्तरक्षण एव सम्बन्धात् प्रथममुपादानम् । तच्चावरकत्वात् सङ्कर्षणनिचोलनिभम्, यतः ज्ञानात् प्रकाशकत्वेन भास्वरप्रायात् स्वच्छाद्धेतुभूतात् कृतं देहादीनां परमात्मने समर्पणम्, श्रीकृष्णाधीनकरणं प्राणानामविकृतमव्ययत्वाद्धेयम् । अतस्तस्मै हितः प्रत्ययः सातिश्च वेद्यः । बुधेऽज्ञानाद् ज्ञानाद्वार्पितं स गृह्णाति, बुधत्वेन वैषम्याभावात् । तदीयत्वेन रत्नमपि तादृशम् । म्रियतेऽनेनेत्यहन्ताममतात्मको विविधदुःखदो मनोदेहेन्द्रियविकृतिजनकः संसारो मरः, तस्य कतो नैर्मल्यजनकः । यतः कं निरतिशयानन्दः, तं तायति तनोति वा उप्रत्ययान्तः । मनोदेहेन्द्रियादीन् स्वभावतो मलिनान्कतकापरपर्यायनिर्मलीकृतघनरसं शोधयति, तथेदमपि । अतः प्रमाणरूपरामेण तादृग्वर्णवसनं धृतम् । अङ्गं सुङ्गं वा पण्डितत्वादनुगृह्णाति ।

सरस्वतीरूपनिचोलरामस्याङ्गे य आनन्दमये रसायाम् ।
श्रीबालकृष्णो रमते यथेच्छं तं पूर्णकामं प्रणमामि देवम् ॥ १ ॥
बुधो विद्यारूपः प्रकटपरमानन्दजनको
निचोलं यन्नीलं सकलरसशृङ्गारविभवम् ।
धृतं येन स्वच्छं मरकतमणिप्रख्यमतुलम्
स मे चित्ते भूयादखिलतिमिराज्ञानदलनः ॥ २ ॥
निकुञ्जे यद्दीनं सरसरमणीनां हृदि तटे
प्रसिद्धं वृन्दाया विपिनभुवनेत्र प्रतिदिनम् ।
प्रमेयं विख्यातं दशरसरसालङ्कृतवपुः
महातेजःपुञ्जं मनसि मम भूयाद्वसुमितम् ॥ ३ ॥
मरकतमिह रत्नं यद्बुधस्योक्तमेत-
त्प्रभवतु मम चित्ते शोधनाय प्रकामम् ।
गुरुचरणसमर्प्या स्याद्यथा पुण्यकर्त्री
सकलदुरितहर्त्री सर्वकामप्रदात्री ॥ ४ ॥
इति बुधस्य मरकताख्यं चतुर्थं रत्नम् ॥ ४ ॥

स्वतन्त्रः कर्ता सकलरसमयः श्रीनिकेतनः पूर्णपुरुषोत्तमोऽर्पितमङ्गीकृतवान्, न वेति संशयमुद्दिधीर्षवो मुकुन्दमुखारविन्दतेजोनिधिरूपाः श्रीवाक्पतय आचार्याः सर्वथा प्रपन्नान् सेवकान् वाचस्पतेः सकलगुणनिधानं पुष्परागाख्यं पञ्चमं रत्नमाहुः **तथा निवेदने चिन्तेति** ।

तथा निवेदने चिन्ता त्याज्या श्रीपुरुषोत्तमे ।
विनियोगेपि सा त्याज्या समर्थो हि हरिः स्वतः ॥ ५ ॥

पुष्यन्ति अनायासेन भक्तानां शुभमनोरथा येन स पुष्यः पुरुषोत्तमः, तत्र रागो येन, समर्पणमात्रादिति अङ्गीकृतिः, तस्मिन्ननुरागादेव सर्वथा भवतीत्यन्वर्थं रत्नम् । अयं भावः । 'पुष्यसिद्ध्यौ नक्षत्र' इति व्युत्पादनात् युध्यन्ति, पुष्टानि भवन्ति भक्तमनसेप्सितानि येन स पुष्यः । स च तेजोमयनक्षत्रात्मा न क्षीयते, न क्षरति, रश्मिभिर्व्याप्तोतीत्यक्षररूपः सदानन्दः पूर्णः श्रीपुरुषोत्तमः, तस्मिन् रागो येन तादृशः । भगवदङ्गीकृतेरिदं लक्षणं यत्तत्र परा भक्तिः प्रादुर्भवति । अत एव पूर्णः सदा ब्रह्माद्याश्रयणीयतया सहितत्वात् पुरुषेषूत्तमश्चेति नोपेक्षतेऽङ्गीकृतवस्तुमात्रम्, अर्पितस्य सच्छब्दार्थरूपत्वेन तस्य श्रीसूर्यनामनामित्वेन तदीयत्वात् । एवं ब्रह्मानन्दादुद्धरणं पदार्थमात्रस्य वेद्यम् । भजनानन्दे योजनं तु पूरणात् पुरुषधर्मः ।

पूरणात् पुरुषतामनवद्यामुत्तमां समधिगम्य रमेशः ।
सोयमत्र नहि मुञ्चति भक्तान् क्रीडति प्रतिदिनं हृदयेषु ॥ १ ॥
पुष्यति [२]प्रतिदिनं हृदये वै येन राग इह भक्तजनानाम् ।
तद्गुरो रसमयं पररत्नं पुष्पराग इति मे मनसि स्यात् ॥ २ ॥
स्वस्य स्वीयजनस्य वा परवशत्वादन्ययोगो भवेत्
दैवादत्र सदा तदा निजजनैश्चिन्ता न कार्या यतः ॥ ३ ॥
सामर्थ्यं पुरुषोत्तमस्य सततं श्रीभर्तुरव्याहतम्

जानीयादिति पुष्परागरचना मे मानसे भासताम् ॥ ४ ॥

इति पुष्परागाख्यं पञ्चमं गुरुदेवस्य रत्नम् ॥ ५ ॥

अहं ममेत्यसद् आग्रहेण लोचति यस्मिन्निति लोकः, पुनः पुनरावर्तनदः प्रवाहमार्गः । अत्र लोचनं नामाहन्तामममतयोरेव विशेषज्ञानम् । तत्र व्यवहारे क्रियमाणे सेवकस्य स्मयनाशनाय फलं न भवति, किन्तु लोके व्यवहारेण फलाभावात् [1]खेदे सति हरिः करिष्यति, तदेव भविष्यतीति निश्चये जाते भगवान् पुष्टिमार्गे एव तिष्ठतीत्यनायासेन सकलमनोरथाः सेत्स्यन्तीति तटस्थतया सेवकैः स्थेयमित्युपदिशन्ति, मर्यादामार्गेपि स्मयनाशनायोपदिशन्ति लोके स्वास्थ्यमित्यादिना ।

लोके स्वास्थ्यं तथा वेदे हरिस्तु न करिष्यति ।
पुष्टिमार्गस्थितो यस्मात् साक्षिणो भवताखिलाः ॥ ६ ॥

भक्तानां स्मयनाशनेन सकलं दुःखं हरतीति हरिर्यतोऽयं तृतीयमार्गस्थः । मर्यादामार्गे देशादीनां कृष्णाश्रयोक्तरीत्या साम्प्रतमसाधकत्वात्, तत्र प्रत्युत प्रत्यूहमेव करोति परीक्षायै, स्वतन्त्रेच्छत्वाच्च, पुष्टिमार्गस्थितत्वेन सुखमेवान्ततः प्रयच्छतीति पुरुषार्थद्वयं सम्पद्यते । अन्यथा वितताने कविध्युक्तसाधने क्लेशेपि फलाभावे सुतरां क्लेशः । तस्मात् स्वयं कविनाम्ना रसाधायकरीत्या अलौकिकं न केनाप्यपनोद्यं फलं प्रयच्छतीति भावः । अत एव कवेर्वज्ररत्नेन व्रजति पर्वततुल्यं किल्विषं गच्छत्यनेनेत्यन्वर्थेन सर्वं सेत्स्यतीति साक्षितया सेवकैस्तत्कृतिं पश्यद्भिरेव स्थेयम् ।

वाणिज्यादौ च वेदे विविधविधिकृतौ विघ्नमेवेति वेद्यम्
यस्मात्तस्मात् फलं वै न भवति नितरां कर्तुरस्य कृपायाः ।
अन्तःस्थभूयोभिमानो न भवति सुतरां मानसं वज्रतुल्यम्
नीरीभूतं यथा स्यात् फलमपि भवति श्रीशनिष्ठं यतस्तत् ॥ १ ॥
पर्वतसदृशं किल्विषमिह जातं भक्तवर्गस्य ।
व्रजति त्वरितं वज्रादित्यन्वर्थं कवे रत्नम् ॥ २ ॥
साक्षीवत्कृतिमादराद्भगवतो यूयं सदा पश्यते-
त्येवं सिध्यति सर्वमीप्सिततमं कार्यं फलं कर्तृतः ।
पुष्टिं श्रीपुरुषोत्तमादुपदिशन्त्यद्धा तदास्यात्मका
आचार्या इह वैष्णवान् स्वकुलतोप्यन्याननन्याश्रितान् ॥ ३ ॥
मर्यादात्यजनं विरुद्धमिह यत्तत्त्वं परं ये विदुः
पुष्टेः किन्तु दरिर्भरित्वमिति तत् स्वीकृत्य पुष्टिं गताः ।
दुष्टास्ते दयया सदा विरहिता वेदाक्षरान् वाचय-
त्यद्धाज्ञान्गुरुमीश्वरं ह्युपदिशन्तीशस्य चाज्ञाद्रुहः [2] ॥ ४ ॥
इति कवेः शुकस्य रत्नं षष्ठम् ॥ ६ ॥

कविर्ज्योतीरूपो देवः सुरासुरभावज्ञ आसुरभावं निन्दयन् दैवभावं स्तुवन् स्वरत्नेन । एवं च प्रह्लादादिष्वासुरत्वेपि तद्धर्माभावादनुग्रहः, अन्येषु निग्रहोपि सूचितोऽनेनेति । दैवैः किं कृत्वा स्थेयमित्यादिसन्देहान् सारिरत्नेन निवर्तयन्ति सेवाकृतिरित्यादिना ।

सेवाकृतिर्गुरोराज्ञा बाधनं वा हरीच्छया ।
अतः सेवापरं चित्तं विधाय स्थीयतां सुखम् ॥ ७ ॥

गृणाति परमात्मनस्तत्त्वमिति गुरुः, 'गुरुं न मर्त्यं मन्येते'ति वाक्यात् तदुपदिष्टमार्गेण रसमयी सेवा विधेया । ततः कदाचिद्भगवदनुग्रहवशात् सेवकस्य विशेषेच्छायां भावरूपा भगवदिच्छा विशेषाकृतिरूपेण तन्मनसः प्राकट्यमाप्नोति, साद्धा भगवदिच्छेत्यनुमित्या मन्तव्या सेवकैः । एवं हि गुर्वाज्ञाबाधनमबाधनं वा हरीच्छया भवतीति भावः । इन्द्रनीलरत्नं त्वतिमन्थरगतेः सर्ववर्णैरनपनोद्यवर्णैः तमसाप्यनुपनोद्यं च सर्ववर्णत्वात् । इन्द्रः परमात्मा परमैश्वर्यवान् सकलरसायां जीवनरसवर्धणशीलः, अत एवायुदात्तस्तद्वदतिनिबिडश्यामसुन्दरमूर्तिः, तस्येदम् । अनेन श्यामसुन्दरसेवायां मनःप्रभृतीनां वृत्तयोऽव्यावृततया मन्थरगतयो रसमयस्थिरविद्युल्लतारूपा भवन्त्यत उक्तं सेवापरं चित्तं विधाय स्थीयतां सुखमिति । निबिडरसकुञ्जसेवाया मन्थरा गतिर्भवतीति

---

१. बेदे इति पाठः । २. भवादिति पाठः । ३. आशाद्रुह इति पाठः ।

सेवासक्त्या सकलं सिध्यतीति व्यञ्जितम् ।

गुरुणा परमेश्वरेण या कथिता सर्वरसप्रदायिनी ।
परमा तनुसेवना तथा वसुना स्वस्य च सा परा मता ॥ १ ॥
यदि सा त्वधिका ततो भवेन्मनसस्तस्य परात्मनः प्रभोः ।
परमेष्टतयावगम्यतां निजभक्तैरवरुध्य चेन्द्रियम् ॥ २ ॥
स्थिरतामुपगम्य सेवयावसरेऽन्यत्र कथारसैस्तथा ।
रविनन्दनरत्ननीलतां रमणीयां हृदये विचिन्तयेत् ॥ ३ ॥
इन्द्रनीलमणिवद्विराजिता सर्ववर्णसमवायदेवता ।
मन्दमन्दगतिमद्रसान्विता मे मनस्यविरतं विराजताम् ॥ ४ ॥

यद्यप्यनेन भगवत्सेवायां देहेन्द्रियाणां स्थिरतोपदिष्टा, तथापि 'यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः । इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः । इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसी'त्यादिवाक्यैर्वायोरिव मनसो दुर्ग्रहत्वेनानेकदुःखोत्पत्त्या चित्तोद्विग्नतायां सेवाया असम्भवात् तन्निवृत्त्यर्थं गोमेदाख्यं विधुंतुदस्याष्टमं रत्नमाहुः चित्तोद्वेगमित्यादिना ।

चित्तोद्वेगं विधायापि हरिर्यत्करिष्यति ।
तथैव तस्य लीलेति मत्वा चिन्तां द्रुतं त्यजेत् ॥ ८ ॥

सांसारिकानन्तदुःखजन्योद्वेगस्य चित्तधर्मतयाऽवश्यं प्रथमं भवनमित्यकृतोपि स कृतो भवतीति कृत्वोक्तिः । तदुत्तरं सेवकस्य यत्कर्तव्यं तदाहुः हरिर्यत्करिष्यतीत्यादिना । सेवकानां सकलदुःखहर्ता हरिर्यदनेकविधं दशललितलकारप्रकृतिबोधितफलाश्रयं करिष्यति, तथैव तस्य हरेर्लीलेति मनसि ज्ञात्वा चिन्तां शीघ्रं विसृजेत् । विधौ लिङ् । विधिः कर्तव्यार्थोपदेशः । करिष्यतीति वर्तमानसामीप्ये लृट् । अनेन वर्तमानकार्यं भविष्यत्कार्यं सकलं भगवल्लीलेति सेवकैर्मन्तव्यमिति भावः । अतीतसमये स्मृतिमात्र आनन्द उपलक्षणत्वेन वेद्यः । वर्तमानस्यानुभूयमानागणितानन्दत्वे रसाधायकत्वम् । भविष्यति तु भाविनि कार्येऽत्युत्कण्ठितं मन इति रसाधायकत्वमिति त्रिष्वपि समयेषु यद्यत्कार्यम्, सा लीला । एवं च सदा चिन्तात्यागे गवामिन्द्रियाणां तेषामाधारसारूपमङ्गलदेहस्य बोधकवाणीनां च स्नेहात्मकभेदो वृद्ध्या गोमेदो विधुंतुदरत्नप्रकाशकस्यास्य भवति । किञ्च, भगवत्सेवकमानसचन्द्रस्य भगवद्वियोगजरसं रूपस्फूर्त्या तत्तल्लीलायाः स्मरणात् तन्मयत्वेन ब्रह्मभूयं लब्ध्वा परब्रह्मभगवत्प्राप्तिरविलम्बेन भवतीति श्रुतिरहस्यार्थोऽनेन व्यञ्जितः ।

चिन्तात्याजनतस्त्वनेन विदुषां वाणीहृषीकादिकाः
पुष्टिं यान्ति निरन्तरं विधुमनःखेदं विधायाद्भुतम् ।
शीघ्रं प्राप्तिरतो यतो भगवतो लक्ष्मीपतेरञ्जसा
गोमेदाभिधरत्नरूपत इदं मे मानसे भासताम् ॥ १ ॥
गोपालगोरक्षणधर्महेतोर्वैश्यत्वमङ्गीकृतमत्र विद्वन् ।
वसुन्धरां गां परिपालनाय कृतावतारत्वमुपेक्षसे कथम् ॥ २ ॥
ब्रह्मण्यदेवासु निजेषु कश्चिन्नियोजनीयः सुरतावनाय ।
नो चेत् कथं ते बिरुदं स्थिरं स्यात् कृपानिधेऽनन्त शरण्य विद्वन् ॥ ३ ॥
इति मुरलीधरवाण्या देहहृषीकाणि पुष्टिमुपयान्तु ।
मुरलीधरस्य सततं श्रीगोपालप्रसादेन ॥ ४ ॥
इत्यष्टमं गोमेदाख्यं रत्नम् ॥ ८ ॥

नन्विदानीन्तनानां सेवकानां श्वः श्वः पापिष्टदिवसत्वेन देशादीनां साधकत्वाभावात् श्रवणादीनां सम्यक्त्वाऽसम्भवात् पूर्वोक्तप्रकाराणां सुतरामसम्भवाच्च कथं फलप्राप्तिरित्याशङ्क्य सा भवत्यनायासेनेति तत्प्रकारः त्रिसूत्रापरपर्यायेण नवमेन वैदूर्यरत्नेनाहुः तस्मादिति ।

तस्मात् सर्वात्मना नित्यं श्रीकृष्णः शरणं मम ।
वदन्निरेव सततं स्थेयमित्येव मे मतिः ॥ ९ ॥

यस्मात् पूर्वोक्तं कर्तुमशक्यम्, तस्माद्धेतोः सर्वात्मना वाचा व्यक्ततया मनसान्तरव्यक्ततया तदर्थानुसन्धानपूर्वकं सदा

आसुरावेशाभावायाष्टाक्षरमुच्चारयद्भिरेव सेवकैः स्थेयम् । यथा मनसोऽन्यत्र वृत्तिर्न भवति, तथा विधेयमिति मे मनीषाऽस्तीत्युपदेशः । अयं भावः । श्रीकृष्ण इति विशेषणम्, शरणमिति विशेष्यम्, त्र्यक्षरं सूत्रद्वयम् । ततः समसम्बन्धबोधकं द्व्यक्षरमपि परोक्षास्तिना त्र्यक्षरीति नव । किञ्च । जीवात्मनः सम्बन्धबोधकं द्विधा, अव्ययमनव्ययं च । अव्ययात् विकाररहितात् पुष्टिमार्गीयसिद्धा पुष्टिमार्गीयाणाम्, साध्येतरेषामिति भावः । भक्तबोधकादनव्ययाच्च प्रवाहमार्गीयभक्तबोधकादस्तीति लीलाबोधकं पदमस्त्विति वा शेषत्वेन विज्ञैर्विज्ञेयम् । एवं च सल्लीलाप्रकाशकत्वेन सह त्र्यक्षरी तृतीयेति नवाक्षरी परमावधिसङ्ख्या वेद्या । एता ब्रह्मसूत्राक्षररूपाः सङ्कर्षणप्रद्युम्नानिरुद्धैर्धृताः, सदैव शिखायज्ञोपवीतधारणं ब्रह्मवैवर्ते व्यक्तम् । ब्रह्मादिभिश्च सहजातत्वेन तद्धारणमन्त्र उक्तत्वादतः सदा धारणम् । 'सदा बद्धशिखेन चे'तिकारिकावन्मालापि सदा धार्या । मलधातोर्धारणार्थकत्वात् । मल्यते सदा ध्रियते सा माला ।

अनुपमसुवर्णरत्नैरद्भुतमाला वसुमितैर्विहिता ।
मध्यश्रीमाणिक्या विराजतां मामके मनसि ॥ १ ॥
इत्यं नवाक्षरीयं परोक्षनित्यास्तिना चोक्ता ।
प्रत्येकं व्यक्तीनां स्वरूपमस्या विराजतां हृदये ॥ २ ॥ ९ ॥

तत्र प्रथमं जगन्मङ्गलमङ्गलमूर्तिर्भगवदुरसि स्थितेन श्रीवर्णेन सकलरत्नसुवर्णरससम्भृता नित्यानन्ता द्वितीया प्रकृतिः संसिद्ध्यर्थिका विराजेते । द्विसुवर्णाकृतिवर्णो यत्र । अत एवादिर्बिस्तरेण बिस्ताराय श्रेष्ठभानुकीर्तिवेद्यपरम्परया प्रकाशकौ यत्र द्वौ सदा विराजमानौ सिद्धसाध्यौ यथा रामित्युक्तं श्रुत्यानुनासिकौ तौ तु व्यवहार्याव्यवहार्यौ । तत्र पूर्वो गत्यर्थप्रकृतिश्चतुर्थः ।

इति श्रीमुरलीधरभट्टविरचिता नवरत्नटीका संपूर्णा ।

१. स्वयमिति पाठः ।

श्रीकृष्णाय नमः ।

नवरत्नम् ।

श्रीलालूभट्टस्य ।



अथ नवरत्नग्रन्थविषये किञ्चिल्लिख्यते । 'प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम्' 'भक्त्याहमेकया ग्राह्यः' 'वशे कुर्वन्ति मां भक्त्या' 'भक्त्यैव तुष्टिमभ्येती'त्यादिवचोभिः प्रेमलक्षणया भक्त्या भगवान् लभ्यः । 'दारान् सुतान् गृहान् प्राणा'नित्यारभ्य 'उद्धवात्मनिवेदिनां मयि सञ्जायते भक्ति'रित्यन्तेन वाक्येन प्रेमलक्षणाया निवेदनलभ्यत्वम् । निवेदनं च देहादिषु स्वकीयत्वाध्यासनिवृत्तिपूर्वकभगवदीयत्वबुद्धिसम्पादने भवति । 'क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्यु'रित्यादिवचनैर्निखिलवस्तूनां भगवदीयत्वात्तदीयत्वबुद्धिसम्पादनेन देहादीनां भगवत्सेवोपयोगिकरणस्य निवेदनपदार्थत्वात् । जाते च निवेदने पुनरिष्टानिष्टप्राप्तिनिवृत्त्युपायविमर्शनादिरूपचिन्ताकृतौ स्वकीयत्वाभिमानेन बाहिर्मुख्यसम्भवान्निवेदनवैयर्थ्यं स्यात् । तथा सति न निस्तार इति परमकृपालुभिराचार्यचरणैश्चिन्तारूपप्रतिबन्धनिवृत्त्यर्थं 'चिन्ता कापि न कार्ये'त्याद्युपदिदिशे ।

अब 'नवरत्नग्रंथ' के विषय में कुछ लिख रहे हैं । "भगवान केवल निष्काम भक्ति से ही प्रसन्न होते हैं, शेष सभी तो मात्र विडंबना है (श्री.भा. ७/७/५२)", "मैं केवल भक्तिको ही प्राप्त होता हूँ (श्री.भा. ११/१४/२१)," **'भक्त्यैव तुष्टिमभ्येती'** इत्यादि वचनों के द्वारा सिद्ध होता है कि भगवान केवल प्रेमलक्षणा-भक्ति द्वारा ही प्राप्त होते हैं । "पत्नी, पुत्र, गृह, प्राण इत्यादि जो स्वयं को प्रिय लगता हो, उसका प्रभु में निवेदन करना चाहिए (श्री.भा. ११/३/२८)" इस वाक्य से लेकर "हे उद्धव ! मुझमें भक्ति हो जाने के पश्चात् आत्मनिवेदियों के लिए और क्या प्राप्त करना शेष रह जाता है ? (श्री.भा. ११/?/२४)" इस वाक्य तक यह सिद्ध होता है कि प्रेमलक्षणा-भक्ति निवेदन करने से प्राप्त होती है । और निवेदन तो समस्त पदार्थों में स्वकीयत्व के अध्यास (भ्रम) की निवृत्तिपूर्वक भगवदीयता की बुद्धि रखने पर सिद्ध होता है । और "हे प्रभु! आपने अपनी क्रीडा के लिए ही इस जगत की रचना की है और जो कुबुद्धि हैं, वे ही खुद को इस जगत का स्वामी मानते हैं (श्री.भा. ८/२२/२०)" इस वाक्यानुसार समस्त वस्तुएँ भगवदीय होने के कारण उनमें भगवदीयता की बुद्धि रखने के द्वारा देह-आदि का भगवत्सेवा में उपयोग करने से ही निवेदन परिपूर्ण होता है । और एक बार निवेदन हो जाने पर पुनः 'इष्ट की प्राप्ति' एवं 'अनिष्ट की निवृत्ति' के उपायों का विचारविमर्श करने से होती हुई चिन्ता को करने से स्वयं में भगवदीयता का अनुसंधान न रहकर स्वकीयता का अभिमान पैदा हो जाता है एवं बहिर्मुखता हो सकती है । ऐसी परिस्थिति में निवेदन व्यर्थ हो जाता है । अतः "ऐसे में जीव का कल्याण होना संभव नहीं है" यह विचार कर परमकृपालु आचार्यचरणों ने प्रभुसेवा में होने वाली चिन्तारूप प्रतिबंध की निवृत्ति के लिए "कोई भी चिन्ता नहीं करनी चाहिए" इत्यादि वाक्यों से नवरत्नग्रंथ में उपदेश दिया है ।

तथापि निवेदनस्य श्रवणाद्यष्टकानन्तरभावित्वात् श्रवणादीनां च प्रत्येकं दुरापतया निवेदनस्य सुतरां तथात्वेन प्रेमलक्षणाया अनुत्पत्त्या कथं भगवदाप्तिरित्याशङ्क्य 'श्रीकृष्णः शरणं ममे'त्यष्टाक्षरमन्त्रो निरन्तरमावर्तनीयः, तेन च सर्वानुपपत्तिपरिहारः सकलसिद्धिश्चेत्युपदिष्टम् । तत्र कथमनुपपत्तिपरिहारपूर्वककार्यसिद्धिरित्याकाङ्क्षायां तदाशयं विवृण्वन्ति प्रभुचरणाः 'साधनफले एकीकृत्य सर्वसमाधानमाहु'रित्या-भासग्रन्थेन । 'श्रीकृष्णः शरणं ममे'त्यष्टाक्षरमन्त्रे साधनफलयोरेकीकरणात्सर्वसमाधानमिति भावः । तथाहि । श्रीकृष्णः फलरूपः निःसाधनजनोज्जृतिकृताभिव्यक्तिः सर्वोद्धारप्रयत्नात्मा मम निःसाधनस्य शरणं आश्रयः शक्याशक्यसम्पादक इति मन्त्रार्थः ।

तथापि, चूँकि निवेदन तो श्रवण आदि आठ प्रकार की भक्ति के पश्चात् आता है और जहाँ ये श्रवण-आदि प्रत्येक आठ प्रकार की भक्ति ही प्राप्त होनी दुर्लभ हो, वहाँ निवेदन प्राप्त होना तो और भी दुर्लभ है । अतः प्रेमलक्षणा भक्ति भी उत्पन्न नहीं होती है और

तब भगवद्-प्राप्ति भी कैसे होगी ? यह शंका होने पर आचार्यचरणों ने 'श्रीकृष्णः शरणं मम' इस अष्टाक्षरमंत्र का निरंतर आवर्तन (पाठ करना) करना कहा है, जिससे समस्त समस्याओं का परिहार हो जायेगा एवं सकल सिद्धि प्राप्त हो जायेगी, इस प्रकार का उपदेश किया है । यहाँ पर "समस्त समस्याओं का परिहार होकर कार्यसिद्धि किस प्रकार से हो जायेगी ?" इस शंका के प्रत्युत्तर में प्रभुचरणों ने इसका आशय "साधन एवं फल को एक करके समाधान कह रहे हैं" इस वाक्य द्वारा अपनी टीका में विवरण किया है । यहाँ उन्होंने 'श्रीकृष्णः शरणं मम' इस अष्टाक्षरमंत्र में साधन और फल को एक करने से सभी का समाधान हो जाता है, यह भाव बताया है । और वह इस प्रकार कि, श्रीकृष्ण फलरूप हैं एवं निःसाधनजनों के उद्धार के लिए ही प्रकट हुए हैं । ऐसे सर्वोद्धारप्रयत्नात्मा-प्रभु ही मुझ निःसाधन के शरण/आश्रय हैं अर्थात् संभव या असंभव सभी कार्यों के संपादक हैं, यह अष्टाक्षरमंत्र का अर्थ है ।

यद्यपि स्वायोग्यताविचारे श्रवणादिसाधनदौर्लभ्येन भगवत्प्राप्तिर्नैश्चिन्त्याभावः, तथापि प्रभोः पुष्टिस्वरूपविचारे शरणागतौ सर्वं सुलभम् । 'तेषामहं समुद्धर्ता मृत्युसंसारसागरा'दित्यादिवाक्यात् । तत्र साधनक्रमेण चेदुद्दिधीर्षुः, तदा जीवाशक्यानपि श्रवणादीन् सम्पाद्योद्धरति । अन्यथा विनापि साधनं कृतार्थयति । अतः शरणगमनं पुमर्थसाधनम् । अत एव 'शरणं भावयेद्धरि'मिति श्रीमदाचार्यैरुक्तम् । 'भक्तद्रोहे भक्त्यभाव' इति च । इह भक्त्यभावे भक्तिसिद्ध्यर्थं हरिं शरणं भावयेदित्यर्थः । प्रकृतेपि श्रवणादिनवविधभक्तीनां दौर्लभ्यं ज्ञात्वा नवविधभक्तिसिद्ध्यर्थमेतन्मन्त्रावृत्तिरुपदिष्टा । अतः प्रमाणबलविचारेण पूर्वपक्षः । प्रमेयबलविचारेण समाहितिरिति ज्ञेयम् । तथाच फलमेव साधनीकृत्येति फक्किकार्थः । अनेन 'श्रीकृष्णः शरणं ममे'ति मन्त्रार्थो व्याख्यातो ज्ञेयः ।

यद्यपि स्वयं की अयोग्यता का विचार करें एवं यह भी विचार करें कि अपने लिए तो श्रवण आदि भक्ति के साधन भी दुर्लभ ही हैं, तो निश्चित् ही भगवत्प्राप्ति नहीं होगी तथापि यदि प्रभु के पुष्टिस्वरूप का विचार करें तो उनके शरणागत होने पर सभी कुछ सुलभ हो जाता है । यह बात 'मैं मृत्युरूप संसारसागर से उनका उद्धार करता हूँ (भ.गी. १२/७)' वाक्य से भी सिद्ध होती है । और यदि वे साधनक्रम से जीव का उद्धार करने की इच्छा करते हैं तो उसके लिए अशक्य श्रवण-आदि भी संपादित करके उसका उद्धार करते हैं । अन्यथा तो साधनों के बिना भी उसे कृतार्थ कर देते हैं । अतः एवं भक्तों के लिए उनकी शरणागति ही सबसे बड़ा साधन है । इसी कारण श्रीमदाचार्यों ने भी 'हरि की शरणागति की भावना करनी चाहिए (वि.धै.आ./१६)' एवं 'यदि किसी भक्त का द्रोह हो जाए अथवा भक्ति का अभाव हो, तब भी हरि ही सर्वथा शरण हैं (वि.धै.आ./११)' यह कहा है। यहाँ भक्ति के अभाव में भक्ति की सिद्धि के लिए हरि की शरणभावना करनी चाहिए, यह अर्थ है । इस ग्रंथ में भी जीव के लिए श्रवण-आदि नवधाभक्ति दुर्लभता जानकर नवधाभक्ति की सिद्धि के लिए आचार्यचरणों ने इस अष्टाक्षरमंत्र आवृत्ति (निरंतर अष्टाक्षर लेते रहना) का उपदेश दिया है । अतः प्रमाणबल का विचार करने पर तो (अर्थात् जब प्रभु साधनों द्वारा अंगीकार करना चाहते हों तब) पूर्व में कहे श्रवण-आदि नौ प्रकार भक्ति के साधन हैं और प्रमेयबल का विचार करने पर (अर्थात् जब प्रभु साधनों की अपेक्षा न रखकर स्वयं कृपा करके अंगीकार करें तब) शरणागति लेने पर प्रभु उसके साधनों की अपेक्षा न रखते हुए उसका अंगीकार कर लेते हैं, यह उपर्युक्त समाधान जान लेना चाहिए । इस प्रकार फल को ही साधन बना कर प्रभु अंगीकार करते हैं, यह फक्किका का अर्थ है । इस प्रकार से उपर्युक्त विश्लेषण द्वारा 'श्रीकृष्णः शरणं मम' मंत्र के अर्थ का व्याख्यान किया गया, यह जानना चाहिए।

किञ्च । अयं मन्त्रो नेतरसाधारणः । किन्तु पुष्टिमार्गीयः । समर्पणगद्यवत् । अत एव प्रभुचरणैरभिहितं 'यदुक्तं तातचरणैः श्रीकृष्णः शरणं मम । तत एवास्ति नैश्चिन्त्यमैहिके पारलौकिक' इति । पुष्टिमार्गीयत्वं च भगवत्स्वरूपातिरिक्तफलाभाववत्त्वम् । तथाच पुष्टिस्थैरयं मन्त्रोनवरतमावर्तनीयः । मनसा पूर्वोक्ततदर्थानुसन्धानेन शरणभावनं च कार्यम् । अत एवोक्तम्, 'एवं चित्ते सदा भाव्यं वाचा च परिकीर्तये'दिति । एवं प्रपत्तौ भगवानशक्यमपि साधयिष्यतीति निष्कर्षः । अत एव तद्विवृतौ प्रभुचरणैरूचे 'सर्वात्मना शरणागतौ प्रभुरेव सम्पादयिष्यतीति हृदय'मिति । तथा सति चिन्तालेशोपि नास्तीति प्रतिबन्धाभावे सिद्धे निवेदनसिद्धौ मुख्यभक्तिलाभः, तेन च भगवत्प्राप्तिरिति चिन्ताकरणनिराकरणनिरूपणस्य सार्थक्यमिति कोविदा एव विदाङ्कुर्वन्तु ।

और, यह मंत्र दूसरे मंत्रों की भाँति कोई साधारण मंत्र नहीं है अपितु समर्पणगद्यमंत्र की भाँति पुष्टिमार्गीय है। इसी कारण प्रभुचरणों ने भी "जो मेरे पितृचरणों ने "श्रीकृष्णः शरणं मम" कहा है, उसी मंत्र से हमें लौकिक-अलौकिक में निश्चिंतता है (वि.२/२३) यह कहा है । और, भगवत्स्वरूप के अतिरिक्त अन्य किसी फल की अपेक्षा जहाँ न हो, वही पुष्टिमार्गीयता है । और पुष्टिमार्गीयों को इसी अष्टाक्षरमंत्र को निरंतर आवर्तन करते रहना चाहिए । एवं पूर्व में कहे मंत्र के अर्थ का मन से अनुसंधान करते हुए शरणभावना करनी चाहिए । इसी कारण आचार्यचरणों ने "इस प्रकार सदा चित्त में हरिशरण की भावना करनी चाहिए एवं वाणी से उनका कीर्तन करना चाहिए (वि.धै.आ./

१३)" यह कहा है । इस प्रकार से शरणागत होने पर प्रभु असंभव को भी सिद्ध कर देंगे, यह निष्कर्ष निकलता है । इसी कारण इस ग्रंथ के नौवें श्लोक के विवरण में प्रभुचरणों ने "सभी प्रकार से शरणागत होने पर प्रभु ही सभी कुछ संपादित करेंगे, यह हार्द है" इस प्रकार से कहा है । ऐसा होने पर लेशमात्र भी चिन्ता नहीं होती हैं और इससे फिर प्रतिबंध भी नहीं होते हैं और तब निवेदत की सिद्धि होकर मुख्यभक्ति प्राप्त होती है । उसी मुख्यभक्ति से तब भगवत्प्राप्ति होती है अतः इस प्रकार चिन्ता न करनेका निरूपण करना सार्थक हुआ, इसे विद्वान् ही जान सकते हैं ।

नवरत्नप्रकाशे, 'अन्यथा दारपरिग्रहोत्तरक्षण एव तन्निवेदनेऽकृतेऽग्रे तदविनियोगे प्राप्ते तत्परिग्रहवैयर्थ्यापत्तिः ।' इयं फक्किका पूर्वफक्किकया न संगच्छत इति बहूनामार्याणां महानेवोद्यमोऽस्मिन्ग्रन्थे नानाविधोऽस्ति । परन्त्वयमशतेनापि न लगतीयं फक्किका । तत्रायं निष्कर्षो बोध्यः । इह लेखकादिदोषवशात्फक्किकानां वैपरीत्यं जातं लेखने । अतः फक्किकानामर्थस्वारस्यं विचार्य पूर्वापरभावं निर्धार्य फक्किका लिख्यन्ते । तथाहि । इह पूर्वं 'निवेदने भजनाधिकारस्तस्मिन् सति तदनिर्वाह इत्युभयतः पाशारज्जुरिति चेत्' इति फक्किकास्ति । तत्रोत्तरमुक्तम्, 'अत्र वदाम' इत्यादिना । तत्र 'गायत्र्युपदेशजसंस्कारव'दित्यन्तेन निवेदनस्यावश्यकतोक्ता । एवं निवेदनस्यावश्यकत्वमुक्त्वा निर्वाहः केन कार्य इत्याकाङ्क्षायां 'निवेदितानामर्थानां भगवद्भोगार्थं विनियोगे जाते तदुत्तप्रसादत्वेन स्वोपभोगकृतिरुचिततरा' इति फक्किकास्ति पठिता । तथाच देहादिनिर्वाहः केन कार्य इत्याकाङ्क्षायां 'निवेदितेन निर्वाहः कार्य इत्युत्तरं सिध्यति । तत्र किं प्रमाणमित्याकाङ्क्षायां 'दासधर्मत्वात्' इत्युक्तम् । तदग्रे भगवद्वाक्यं प्रमाणत्वेनोपन्यस्य निवेदितेन निर्वाहः कार्य इति ज्ञापनार्थं 'मुच्छि-ष्टभोजिनो दासा' इत्यादिवाक्यै'रात्मशोधकत्वाच्चे'ति पठितम् ।

नवरत्नप्रकाश में -"अन्यथा पत्नी से विवाह करने के दूसरे ही क्षण यदि उसका भगवान में निवेदन न करें तो आगे वह स्वयं के लिए अनुपयुक्त हो जाती है एवं उससे किया गया विवाह ही व्यर्थ हो जाने की आपत्ति आती है"- प्रभुचरणों की इस पंक्ति की संगति पूर्व की पंक्ति के साथ नहीं बैठ पाती, ऐसा कहकर अनेक विद्वानों ने इस ग्रंथ में नाना प्रकार से महापरिश्रम किया है परंतु अनेक बार परिश्रम करने के पश्चात् भी इस पंक्ति की संगति नहीं बैठ पायी है। ऐसे में निष्कर्ष यह जानना चाहिए कि, यहाँ किसी लेखक-आदि के दोष से लिखने में कुछ पंक्तियाँ आगे-पीछे लिख दी गयी हैं । अतः अब हम प्रभुचरणों की इन पंक्तियों के गूढ़ार्थ का विचार करके एवं पूर्वापर के भावों का (अर्थात् इन पंक्तियों के पूर्व में एवं पश्चात् आए हुए भावों का) निर्धारण करके पुनः लिख रहे हैं । वह इस प्रकार कि, इस पंक्ति से पूर्व में "निवेदन होने पर ही भजन का अधिकार प्राप्त होता है और निवेदन कर देने पर निवेदित वस्तुओं से स्वयं का निर्वाह नहीं हो सकता अतः परिस्थिति यह हो जाती है कि आगे कुंआँ तो पीछे खाई" यह पंक्ति है । इसका उत्तर प्रभुचरणों ने 'अब हम इसका समाधान कह रहे हैं' इस वाक्य द्वारा दिया है । वहीं फिर उन्होंने - "जिस प्रकार गायत्री-उपदेश के द्वारा वैदिक कर्मों का अधिकार प्राप्त होता है, वैसे ही निवेदन के पश्चात् भगवत्सेवा का" - इस वाक्य द्वारा निवेदन की आवश्यकता कही है । इस प्रकार निवेदन की आवश्यकता कह कर 'स्वयं का निर्वाह कैसे करना?' यह शंका होने पर "निवेदित किए गये पदार्थों का जब भगवद्-भोग के लिए विनियोग होता है, तब भगवान के द्वारा दिए गये उस प्रसाद को अपने लिए उपभोग करना उचिततर है" इस प्रकार की पंक्ति है । और इसी प्रकार 'देहादि का निर्वाह कैसे करना ?' यह शंका होने पर 'निवेदित पदार्थों से ही निर्वाह करना चाहिए' यह उत्तर सिद्ध होता है। इस उत्तर में 'प्रमाण क्या है' यह शंका होने पर प्रभुचरणों ने "क्योंकि यही दासधर्म है" यह कहा है । इसके पश्चात् भगवद्-वाक्यों को प्रमाणरूप से कहकर "निवेदित से ही निर्वाह करना चाहिए" यह बताने के लिए 'हम आपकी जूठन खाने वाले दास हैं (श्री.भा. ११/६/४६)' इत्यादि वाक्यों द्वारा उन्होंने यह कहा कि "भगवत्प्रसाद आत्मशोधक भी है" ।

तदग्रे 'अन्यथा दारपरिग्रहोत्तरक्षण एव तन्निवेदनेऽकृतेऽग्रे तदविनियोगे प्राप्ते तत्परिग्रहवैयर्थ्यापत्ति'रिति फक्किकया अन्यथानुपपत्तिः प्रदर्शिता । तदग्रे 'अपरञ्चे'त्यारभ्य 'अनिवेदितस्य निषिद्धत्वा'दित्यन्तेन निवेदनदानयोः पुनः स्वविनियोगतदभावाभ्यां वैलक्षण्यं प्रदर्श्य भगवदनिवेदितेन निर्वाहं निषिध्य भगवन्निवेदितपदार्थेन भगवदुपभुक्तशिष्टेन प्रसादतया प्राप्तेन निर्वाहः कार्य इति सिद्धान्तितम् । एवं फक्किकाक्रमे सर्वोऽपि ग्रन्थः सङ्गतो भवति । तथाच सिद्धमेतत् । 'द्विजस्य वैदिके कर्मणि गायत्र्युपदेशजसंस्कारव'दिति फक्किकाया अग्रे "निवेदितानामर्थानां भगवद्भोगार्थं विनियोगे जाते तदुत्तप्रसादत्वेन स्वोपभोगकृतिरुचिततरा । दासधर्मत्वात् । 'उच्छिष्टभोजिनो दासा' इत्यादिवाक्यैरात्मशोधकत्वाच्चे"त्यन्तो ग्रन्थो ज्ञेयः । एतदग्रे 'अन्यथा दारपरिग्रहोत्तरक्षण एव तन्निवेदनेऽकृतेऽग्रे तदविनियोगे प्राप्ते तत्परिग्रहवैयर्थ्यापत्तिः । अपरञ्च । दाने हि न स्वविनियोगः । न तु निवेदने । अन्यथा निवेदितान्नादेर्भोजनं न स्यात् । अनिवेदितस्य निषिद्धत्वात्' इत्यन्तो ग्रन्थोऽस्ति । तदग्रे 'किन्तु प्रभौ निवेदितार्थविनियोगे जातेऽग्रे तदर्थं यत्नः कार्यो न वेति भवति चिन्ते'त्यादिरूपो ग्रन्थोऽस्तीति सर्वमनवद्यम् ।

नवरत्नम् ।

इसके पश्चात् ''अन्यथा....आपत्ति'' इस पंक्ति के द्वारा निवेदन न करने पर विवाह की व्यर्थता प्रदर्शित की गई है। इन सबके पश्चात् 'अपरञ्च'' इस शब्द से लेकर 'अनिवेदितस्य निषिद्धत्वात्' तक के शब्दों से 'निवेदन' एवं 'दान' में ''किस का उपयोग स्वयं के लिए किया जा सकता है और किसका नहीं'' यह विलक्षणता प्रदर्शित करके भगवान को निवेदित न किए गये पदार्थ से देहनिर्वाह का निषेध करके भगवान को निवेदित किए गये पदार्थ द्वारा अर्थात् भगवान के द्वारा उपभुक्त किए गये पदार्थों से शेष बचे पदार्थ को प्रसादरूप ग्रहण करके निर्वाह करना चाहिए, यह सिद्धांत स्थापित किया गया । अतः इस प्रकार से पंक्तियों को बैठाने पर उनकी मूलग्रंथ से संगति मिल जाती है । और यह संगति ठीक है क्योंकि ''द्विजस्य.....वत्'' इस पंक्ति के आगे ही ''निवेदितानां.....दासा'' इत्यादि वाक्यों के द्वारा 'आत्मशोधकत्वाच्च' यहाँ तक की पंक्तियाँ मूलग्रंथ के साथ बराबर मिलती चली जाती हैं । इसी के आगे ''अन्यथा.....निषिद्धत्वात्'' यहाँ तक की पंक्तियाँ भी ग्रंथ में हैं। और इसके पश्चात् ''किन्तु.....चिन्ता'' इत्यादि पंक्तियाँ भी ग्रंथ में हैं और संगति उचितरूप से बैठती चली जाती है, अतः यह सभी कुछ उचित ही है ।